प्रेम बहादुर वर्मा M.Sc., B.T.

# ऋग्वेदभाष्यम्

ऋषिभाष्यतोऽग्रे
ऋग्वेदसप्तममण्डलान्तर्गतैकषष्टितम-

## सूक्तमारभ्याष्टषष्टितमसूक्तानां भाष्यम्


भाष्यरचयिता

## स्वामी ब्रह्ममुनिः परिव्राजको विद्यामार्तण्डः



प्रकाशिका

**परोपकारिणी सभा,**
**अजमेर**

| | | |
|---|---|---|
| | जुलाई | मूल्यम् |
| प्रथम संस्करणम् | १९७२ ई० | ४)०० |

अथ भाष्यतोऽग्रे

# ऋग्वेदस्य सप्तमे मण्डले

## एकषष्ठितमे सूक्ते

तृतीय मन्त्रः—

ऋष्वाद्

**प्रोरोर्मित्रावरुणा पृथिव्याः प्र दिव ऋष्वाद् बृहतः सुदानू ।**
**स्पशो दधाथे ओषधीषु विक्ष्वृधग्यतो अनिमिषं रक्षमाणा ॥३॥**

प्र । उरोः । मित्रावरुणा । पृथिव्याः । प्र । दिवः । ऋष्वात् । बृहतः । सुदानू इति सुदानू । स्पशः । दधाथे इति । ओषधीषु । विक्षु । ऋधक् । यतः । अनिऽमिषम् । रक्षमाणा ॥ ३ ॥

**संस्कृतान्वयार्थः**—( सुदानू ) हे सुष्ठुविज्ञानदातारौ ! ( मित्रावरुणा ) अध्यापकोपदेशकौ युवाम् ( ओषधीषु ) स्थावरेषु ( विक्षु ) प्रजासु प्रकृष्टं जायमानासु जङ्गमयोनिषु ( यतः ) यन्ति गच्छन्ति ये तान् जीवान्-अभिलक्ष्य ( ऋधक् ) पृथग्भावेन-पृथक्-पृथक् "ऋधगिति पृथग्भावस्य प्रवचनं भवति" [ निरु० ४ । १५ ] ( अनिमिषम् ) अनियतकामं निष्कामम् ( रक्षमाणा ) रक्षमाणौ ( उरोः पृथिव्याः ) विस्तृतस्य प्रथितविद्यास्थानस्य ( ऋष्वात्-बृहतः-दिवः ) महतो "ऋष्वो महन्नाम" [ निघं० ३ । ३ ] यो महान् तस्य ज्ञान-मण्डलस्य ( स्पशः ) स्पर्शयन्ते गृह्यन्ते प्राप्यन्ते ये तान् विद्या ज्ञानविषयान् "स्पश ग्रहणसंश्लेषणयोः" [ चुरादि० ] ( प्र-प्रदधाथे ) प्रकृष्टतरं धारयथः "अन्तर्गत णिजर्थः" ॥ ३ ॥

**भाषान्वयार्थ**—( सुदानू ) हे सर्वोत्तम-विद्याज्ञानदान के देने वाले ( मित्रावरुणा ) अध्यापक और उपदेशक ! तुम दोनों ( ओषधीषु ) स्थावरों वृक्षों में ( विक्षु ) प्रकृष्ट जायमान जङ्गमयोनियों में ( यतः ) जाने वाले-प्राप्त होने वाले जीवों को ( ऋधक् ) पृथक्-पृथक् ( अनिमिषम् ) अनियत हेतु-निष्काम भाव को लक्ष्य कर ( रक्षमाणा ) रक्षण करने वाले हुए

( उरोः पृथिव्याः ) बड़े प्रथित विद्यास्थान के ( ऋष्वात्–बृहतः ) महान् से महान् ( दिवः ) ज्ञानमण्डल—सभास्थल के ( स्पशः ) विद्याज्ञानविषयों को ( प्र–प्रदधाथे ) प्रकृष्टतर रूप में धारण करते हो ॥ ३ ॥

भावार्थ—अन्नादि ओषधियों और प्राणियों की रक्षावृद्धि के लिये विद्या स्थान में विद्यादान तथा ज्ञानप्रसारण क्षेत्र में ज्ञान दान अध्यापक और उपदेशक निष्काम भाव से देकर राष्ट्र को सुख सम्पन्न करें ॥ ३ ॥

**शंसा मित्रस्य वरुणस्य धाम शुष्मो रोदसी बद्बधे महित्वा ।**
**अयन्मासा अयज्वनामवीराः प्र यज्ञमन्मा वृजनं तिराते ॥ ४ ॥**

शंस । मित्रस्य । वरुणस्य । धाम । शुष्मः । रोदसी इति । बद्बधे । महिऽत्वा । अयन् । मासाः । अयज्वनाम् । अवीराः । प्र । यज्ञऽमन्मा । वृजनम् । तिराते ॥ ४ ॥

संस्कृतान्वयार्थः—( मित्रस्य ) हे अध्यापक ! त्वं निजस्य ( वरुणस्य ) हे–उपदेशक ! त्वं स्वस्य ( धाम ) विद्यास्थानं प्रवचन-स्थानम् ( शंस ) ज्ञापय ( शुष्मः ) मनोबलं ज्ञानबलं वा ( महित्वा ) महत्वेन ( रोदसी ) द्यावापृथिव्यौ ज्ञानस्य रोधनस्थानौ "रोदसी रोधसी द्यावापृथिव्यौ विरोधनात्–रोधः कूलं निरुणद्धि स्रोतः" [ निरु० ६ । १ ] द्यावापृथिवीविषयकज्ञानप्रसङ्गौ ( बद्बधे ) बध्नाति ( अयज्वनाम् ) युवयोः सत्सङ्गयज्ञमकुर्वताम् ( मासाः ) जीवनमासाः ( अवीराः ) अबलाः, अफलाः ( अयन् ) यन्ति–गच्छन्ति ( यज्ञमन्मा ) सङ्गतिकरणे मनो यस्य सोऽध्येता श्रोता "अधायि मन्म मनोऽधायि" [ निरु० ६ । १२ ] ( वृजनम् ) बलम्–ज्ञानबलम् "वृजनं बलनाम" [ निरु० २ । २ ] ( प्रतिराते ) प्रवर्धयति ॥ ४ ॥

भाषान्वयार्थ—( मित्रस्य ) हे अध्यापक ! अपने ( वरुणस्य ) हे उपदेशक ! अपने ( धाम ) विद्यास्थान प्रवचनस्थान को ( शंस ) प्रशंसित कर–प्रसिद्ध कर–दर्शा ( शुष्मः ) तेरा–आपका मनोबल या ज्ञान बल ( महित्वा ) महत्त्व में ऊंचा होने से ( रोदसी ) पृथिवी लोक द्युलोक को ज्ञान के रोधनस्थानों–तटों को–पृथिवी से द्युलोक तक के ज्ञानप्रसङ्गों को ( बद्बधे ) बांधे हुए है ( अयज्वनाम् ) तुम्हारे सङ्गतिकरण से रहितों के ( मासाः ) जीवन के मास–महीने ( अवीराः ) अबल,–अफल, निष्फल ( अयन् ) चले जाते हैं ( यज्ञमन्मा ) तुम्हारी सङ्गति में मन रखने वाला

मनुष्य–अध्येता श्रोता जन ( वृजनम् ) स्व बल को ( प्रतिराते ) प्रवृद्ध करता है–बढ़ाता है ॥ ४ ॥

भावार्थ—विद्वान् अध्यापक और उपदेशक महानुभावों के शिक्षण प्रवचन स्थानों पर उपस्थित होकर उन की सङ्गति से अपना ज्ञानबल बढ़ाना मानव जीवन का लक्ष्य है, अन्यथा जीवन के मासों को निष्फल करना है–मानव जीवन का फल नहीं है ॥ ४ ॥

**अमूरा विश्वा वृषणाविमा वां न यासु चित्रं ददृशे न यक्षम् । द्रुहः सचन्ते अनृता जनानां न वां निण्यान्यचिते अभूवन् ॥ ५ ॥**

अमूरा । विश्वा । वृषणौ । इमाः । वाम् । न । यासु । चित्रम् । ददृशे । न । यक्षम् । द्रुहः । सचन्ते । अनृता । जनानाम् । न । वाम् । निण्यानि । अचिते । अभूवन् ॥ ५ ॥

संस्कृतान्वयार्थः—( अमूरा ) अमूरौ–कर्तव्यतत्परौ सावधानावध्यापकोपदेशकौ ! ( विश्वा ) विश्वौ–उद्देश्यपूर्तये सर्वविषये प्रविष्टौ ( वृषणौ ) ज्ञानवृष्टिकर्त्तारौ ( वाम् ) युवयोः ( चित्रम् ) चायनीयमामन्त्रणम् "चित्रं चायनीयम्" [ निरु० १२ । १६ ] ( यक्षम् ) पूजनं सत्करणम् "यक्ष–पूजायाम्" [ चुरादि० ] ( यासु ) यासु प्रजासु ( न ) नैव ( ददृशे ) दृश्यते ( इमाः ) एताः प्रजाः ( द्रुहः ) द्रोग्धर्यः सत्यः ( जनानाम् ) जायमानानां मनुष्यादीनाम् ( अनृता ) अनृतानि–ऋतं मनो न येषु तानि–अनिष्टानि "मनो वा ऋतम्" [ जै० उ० ३ । ६ । ८ । ५ ] ( सचन्ते ) सम्पादयन्ति, यतः ( वाम् ) युवयोः ( निण्यानि ) अन्तर्हितानि सुखज्ञानानि "निण्यमन्तर्हितनाम" [ निघं० ३ । २५ ] ( अचिते ) न चेतयति तस्मै प्रमादिनेऽज्ञाय वा ( न ) नैव ( अभूवन् ) भवन्ति ॥ ५ ॥

भाषान्वयार्थ—( अमूरा ) हे सचेत कर्तव्य परायण सावधान ( विश्वा ) सर्व विषय में प्रविष्ट ( वृषणौ ) ज्ञान–वृष्टि करने वाले अध्यापक उपदेशको ! ( वाम् ) तुम दोनों का ( चित्रं यक्षम् ) आचरणीय आमन्त्रण सत्कार–ज्ञान लाभ ( यासु ) जिन प्रजाओं में ( न ) नहीं ( ददृशे ) दिखलाई पड़ता है ( इमाः ) वे प्रजायें ( द्रुहः ) द्रोही बन ( जनानाम् )

जन्मधारी मनुष्य आदि प्राणियों के ( अनृता ) अनिष्टों-अपकारों को ( सचन्ते ) सम्पादन करते हैं, कारण कि ( वाम् ) तुम्हारे ( निण्यानि ) अन्तर्हित रहस्यमय ज्ञानलाभ ( अचित्ते ) न चेतने वाले-प्रमादी-अज्ञ-जन के लिये ( न ) नहीं ( अभूवन् ) हुआ करते हैं ॥ ५ ॥

भावार्थ—नित्य ज्ञानवृष्टि करने वाले अध्यापक और उपदेशक जनों का आमन्त्रण और सत्कार करके उन से ज्ञान लाभ करना चाहिये, क्योंकि अज्ञानान्धकार से दूर हो कर सच्चे मनुष्य बन सुख पाते हैं, जिन मनुष्यों में इन का आमन्त्रण सत्कार कर ज्ञान लाभ नहीं वे अज्ञ प्रमादी बन अन्यों का अनिष्ट अपकार ही कर महापापी बनते हैं ॥ ५ ॥

समु वां यज्ञं महयं नमोभिर्हुवे वां मित्रावरुणा सबाधः ।
प्र वां मन्मान्यृचसे नवानि कृतानि ब्रह्म जुजुषन्निमानि ॥६॥

सम् । ऊँ इति । वाम् । यज्ञम् । महयम् । नमःऽभिः । हुवे । वाम् । मित्रावरुणा । सऽबाधः । प्र । वाम् । मन्मानि । ऋचसे । नवानि । कृतानि । ब्रह्म । जुजुषन् । इमानि ॥ ६ ॥

सं० अन्वयार्थः—( मित्रावरुणा ) हे अध्यापकोपदेशकौ ! ( वाम् ) युवयोः ( यज्ञम् ) सत्सङ्गम् ( उ ) अवश्यम् ( सम्-महयम् ) सम्यगनुतिष्ठेयम् ( सबाधः ) यदा-अहं बाधया पापाज्ञानवासनया युक्तो भवेयं तदा ( नमोभिः ) नमस्कारोक्तिभिरुपासनाभिः ( वाम् ) युवाम् ( हुवे ) आह्वयामि-प्रार्थये ( वाम् ) युवयोः ( इमानि ) एतानि ( नवानि ) नूतनानि ( मन्मानि ) मननीयानि मन्तव्यानि "मन्मानि मननीयानि" [ निरु० १० । ५ ] ( कृतानि ) कर्तव्यानि ( ब्रह्म-ऋचसे ) महदत्यन्तं सेवितुम् ( जुजुषन् ) प्रीणन्ति ॥ ६ ॥

भाषान्वयार्थ—( मित्रावरुणा ) हे अध्यापक और उपदेशक ! ( वाम् ) तुम दोनों के ( यज्ञम् ) सत्सङ्ग को ( उ ) अवश्य ( सम्महयम् ) भली भांति सेवन करूँ, जब मैं ( सबाधः ) बाधापाप-अज्ञान वासना से युक्त होऊं तब ( नमोभिः ) नमस्कारों-उपासनाओं से ( हुवे ) बुलाता हूँ ( वाम् ) तुम्हारे ( इमानि-नवानि-मन्मानि ) ये नये मन्तव्य ज्ञानविषय ( कृतानि ) कर्तव्य-सदाचरण ( ऋचसे ) सेवन करने को ( ब्रह्म ) अत्यन्त ( जुजुषन् ) प्रिय लगते हैं ॥ ६ ॥

भावार्थ—विद्याध्यापक और धर्मोपदेशक का सत्सङ्ग कर उन के विचारों और आचारों को अपने जीवन में चरितार्थ कर पाप-अज्ञान-वासना के दुःख से दूर होना चाहिए ॥ ६ ॥

**इयं देवा पुरोहितिर्युवाभ्यां यज्ञेषु मित्रावरुणावकारि ।**
**विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः**
**॥ ७ ॥**

इयम् । देवा । पुरःऽहितिः । युवाभ्याम् । यज्ञेषु । मित्रावरुणा । अकारि । विश्वानि । दुःऽगा । पिपृतम् । तिरः । नः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

**सं० अन्वयार्थः**—( मित्रावरुणौ देवा ) हे अध्यापकोपदेशकौ विद्वांसौ ( यज्ञेषु ) अध्ययनश्रवणस्थलेषु ( इयं पुरोहितिः ) एषा पुरस्कृतिः युवाभ्याम्-अकारि युष्मदर्था मया या कृता सा च युवाभ्यां स्वीकृता तदर्थं याति धन्यवादः, पुनश्च ( विश्वानि-दुर्गा ) सर्वाणि दुर्गाणि-दुर्गमनानि ( तिरः ) तिरस्कृत्य-अपहृत्य ( नः ) अस्मान् ( पिपृतम् ) पालयतम् ( यूयम् ) वचनव्यत्ययः पूजार्थे वा बहुवचनम् ( स्वस्तिभिः ) कल्याणवचनैरध्यापनोपदेशैः ( नः ) अस्मान् ( पात ) रक्षतम् ॥ ७ ॥

भाषान्वयार्थ—( मित्रावरुणौ-देवा ) हे अध्यापक और उपदेशक विद्वानो ! ( यज्ञेषु ) अध्ययन श्रवण स्थलों में ( इयं पुरोहितिः ) यह भेंट या शरणप्राप्ति ( युवाभ्यां-अकारि ) तुम ने स्वीकृत की तदर्थ धन्यवाद, अतः ( विश्वानि-दुर्गा ) सब दुर्गतियों को ( तिरः ) तिरस्कृत-दूर करके ( नः ) हमें ( पिपृतम् ) पालो-सुरक्षित रखो ( यूयम् ) तुम ( स्वस्तिभिः ) कल्याण वचनों-अध्यापन उपदेश द्वारा ( नः ) हमारी ( पात ) रक्षा करो ॥ ७ ॥

भावार्थ—अध्यापक और उपदेशक विद्वानों से विद्याध्ययन और उपदेश श्रवण के निमित्त सदा भेंट शरण प्राप्ति करे उन के कल्याणकारी वचन प्रवचनों का अध्ययन और श्रवण करना चाहिए ॥ ७ ॥

# द्वाषष्टितमं सूक्तम्

ऋषिः—वासिष्ठः ।

देवता १—३ सूर्यः । ४—६ मित्रावरुणौ ।

छन्दः—त्रिष्टुप् ॥

उत्सूर्यो बृहदर्चींष्यश्रेत्पुरु विश्वा जनिम मानुषाणाम् ।
समो दिवा ददृशे रोचमानः क्रत्वा कृतः सुकृतः कर्तृभिर्भूत्
॥ १ ॥

उत् । सूर्यः । बृहत् । अर्चींषि । अश्रेत् । पुरु । विश्वा । जनिम । मानुषाणाम् । समः । दिवा । ददृशे । रोचमानः । क्रत्वा । कृतः । सुऽकृतः । कर्तृऽभिः । भूत् ॥ १ ॥

सं० अन्वयार्थः—( सूर्यः ) साक्षाद् विद्यासूर्य आचार्यः ( मानुषाणाम् ) मनुष्याणाम् ( विश्वा जनिम ) विश्वानि सर्वाणि-जनिमानि जायन्ते येषु तानि ब्राह्मणादिकुलानि प्रति ( पुरु ) पुरूणि बहूनि "पुरु बहुनाम" [ निघं० ३ । १ ] ( अर्चींषि ) ज्ञानज्योतींषि ( बृहत् ) प्रधान्येन ( उद्-अश्रेत् ) उच्छ्रयति-उत्क्षिपति ( दिवा ) विद्या-प्रकाशेन ( रोचमानः ) देदीप्यमानः ( समः ) पूर्णो विघ्नबाधासु-खल्वेकरूपो वा ( ददृशे ) दृश्यते ( कर्तृभिः ) अध्ययनकर्तृभिः शिष्यैः ( क्रत्वा ) शुश्रुषाख्यकर्मणा प्रज्ञया वा "क्रतु कर्मनाम" [ निघं० २ । १ ] "क्रतु प्रज्ञानाम" [ निघं० ३ । ६ ] ( कृतः ) सत्कृतः-आचार्यत्वे मतो वा ( सुकृतः ) शुभकर्मा ( भूत् ) भवति ) ॥ १ ॥

भाषान्वयार्थ—( सूर्यः ) साक्षात् विद्यासूर्य आचार्य ( मानुषाणाम् ) मनुष्यों के ( विश्वा जनिम ) सारे जन्म पाने के आधार ब्राह्मण आदिकों के प्रति ( पुरु ) बहुत ( अर्चींषि ) ज्ञान ज्योतियों को ( बृहत् ) प्रधानरूपसे खूब ( उद्-अश्रेत् ) बखेर रहा है ( दिवा ) विद्याप्रकाश से ( रोचमानः ) देदीप्यमान हुआ ( समः ) पूर्ण या विघ्नबाधाओं में एकरूप ( ददृशे ) दिखाई देता है ( कर्तृभिः ) अध्ययन करने वाले शिष्यों से ( क्रत्वा ) कर्म से प्रज्ञा से ( कृतः ) सत्कृत हुआ आचार्य ( सुकृतः ) शुभफलसाधक ( भूत् ) होता है ॥ १ ॥

भावार्थ—विद्यासूर्य आचार्य मनुष्यमात्र को निष्पक्ष भाव से अपनी विद्या का दान देता है, वह सदा सुख दुःख में समान रहता है। ऐसे आचार्य की सेवा में रहने से मनुष्य योग्य अध्यापक और उपदेशक बनता है ॥ १ ॥

स सूर्य प्रति पुरो न उद्गा एभिः स्तोमेभिरेतशेभिरेवैः ।
प्र नो मित्राय वरुणाय वोचोऽनागसो अर्यम्णे अग्नये च ॥२॥

सः । सूर्य । प्रति । पुरः । नः । उत् । गाः । एभिः । स्तोमेभिः । एतशेभिः । एवैः । प्र । नः । मित्राय । वरुणाय । वोचः । अनागसः । अर्यम्णे । अग्नये । च ॥ २ ॥

सं० अन्वयार्थः—( सूर्य ) हे विद्यासूर्य-आचार्य ! ( सः ) स त्वम् ( नः ) अस्माकम् ( पुरः प्रति ) नगराणि प्रति एभिः ( स्तोमेभिः ) एतैः प्रतिधिभिर्नगरप्रदेशैर्ग्राम्यप्रान्तैः "स्तोमा आसन् प्रतिधयः" [ ऋ० १० । ८५ । ८ ] ( एवैः ) अयनैः यानैः "एवैरयनैः" [ निरु० १२ । २१ ] ( एतशेभिः ) अश्वैः "एतश इत्यश्व नाम" [ निघं० १ । १४ ] ( उद्गाः ) उद्गच्छ-उपरि विराजस्व ( मित्राय ) अध्यापकाय ( वरुणाय ) उद्देशकाय ( अर्यम्णे ) अन्नदात्रे भूमिहाराय ग्रामपतये राज्ञे वा "अर्यमेति तमाहुर्यो ददाति" [ तै० १ । १ । २ । ४ ] ( अग्नये ) ( च ) तथा यः प्रजा अग्रे नयति तस्मै प्रजामुख्याय "अग्निः कस्मात् अग्रणीर्भवति [ निरु० ७ । १४ ] ( प्रवोचः ) प्रवचनं कुरु । यत् ( नः ) अस्मभ्यम् ( अनागसः ) प्रजाजना अपापाः परस्परं सुख कारिणः स्युः ॥ २ ॥

भाषान्वयार्थ—( सूर्य ) हे विद्यासूर्य-आचार्य ! ( सः ) वह तू ( नः ) हमारे ( पुरः प्रति ) नगरों के प्रति-नगरों में ( एभिः स्तोमेभिः ) इन नगर प्रदेशों-ग्राम्य प्रान्तों से ( एवैः ) यानों से ( एतशभिः ) घोड़ों से ( उद्गाः ) ऊपर विराजो, चढ़ कर चलो ( मित्राय ) अध्यापक के लिए ( वरुणाय ) उपदेशक के लिए ( अर्यम्णे ) अन्नदाता-भूमिहार के लिए, ग्रामपति या राजा के लिए ( च ) और ( अग्नये ) प्रजानायक के लिये ( प्रवोचः ) प्रवचन कर-शिक्षा दे, जिस से ( नः ) हमारे लिये ( अनागसः ) ये प्रजा जन पापरहित परस्पर कल्याण साधक हों ॥ २ ॥

भावार्थ—विद्यासूर्य आचार्य नगरों में ग्राम प्रदेशों में मार्गों से यथा-

सम्भव घोड़ों यानों से जावे। अध्यापक उपदेश राजप्रतिनिधि प्रजाप्रतिनिधि जनों को यथोचित शिक्षा प्रवचन से निष्पाप परस्पर सुखदायक बनावे॥ २॥

**वि नः सहस्रं शुरुधो रदन्त्वृतावानो वरुणो मित्रो अग्निः।**
**यच्छन्तु चन्द्रा उपमं नो अर्कमा नः कामं पूपुरन्तु स्तवानाः॥ ३॥**

वि। नः। सहस्रम्। शुरुधः। रदन्तु। ऋतऽवानः। वरुणः। मित्रः। अग्निः। यच्छन्तु। चन्द्राः। उपऽमम्। नः। अर्कम्। आ। नः। कामम्। पूपुरन्तु। स्तवानाः॥ ३॥

सं० अन्वयार्थः—( वरुणः ) उपदेशकः ( मित्रः ) अध्यापकः ( अग्निः ) अग्रे नायकः प्रजामुख्यजनः ( ऋतवानः ) सत्यकर्मिणः ( नः ) अस्मभ्यम् ( शुरुधः ) शुचं शोकं दुःखं रुन्धन्ति यास्ताः सुखस्थापो नदीः कुल्याः "शुरुध आपो भवन्ति शुचं रुन्धन्ति" [ निरु० ६। १६ ] ( सहस्रम् ) बहु क्रियाविशेषणम् "सहस्रमिति बहुनाम" [ निघं० ३। १ ] ( विरदन्तु ) प्रवाहयन्तु ( चन्द्राः ) आह्लादकारिण्यो नद्यः "चन्द्रा ह्यापः [ तै० १। ७। ६। ३ ] ( नः ) अस्मभ्यम् ( उपमम् ) उपमीयते यथावत् प्रणीयते दीयते यथोचितमुपयुक्तं धान्यादिकं वस्तु उपपूर्वान्मेङः घञर्थे कविधानमिति कः प्रत्ययः ( अर्कम् ) अर्चनीयं मन्त्रं विचारम् "अर्को मन्त्रो भवति" [ निरु० ५। ४ ] "यद्वा अन्नम्" "अर्कमन्ननाम" [ निघं० २। ७ ] ( यच्छन्तु ) ददतु, अथ ( स्तवानाः ) स्तूयमानाः सेवमानाः ( नः ) अस्माकम् ( कामम् ) कमनीयं मनोरथम् ( आपूपुरन्तु ) समन्तात् पूरयन्तु॥ ३॥

भाषान्वयार्थ—( वरुणः ) उपदेशक ( मित्रः ) अध्यापक ( अग्निः ) प्रजामुख्य–प्रजा का अग्रणी ( ऋतवानः ) सत्यकर्मी ( नः ) हमारे लिये ( शुरुधः ) शोक दुःख को बन्द कर सुख के स्रोतों को ( सहस्रं विरदन्तु ) बहुत बहा दे ( चन्द्राः ) ये आह्लादकारी जल ( नः ) हमारे लिये ( उपमम् ) उपयुक्त ( अर्कम् ) मन्त्र विचार तथा अन्न को ( यच्छन्तु ) प्रदान करें और ( स्तवानाः ) स्तुति–प्रशंसा सेवा को प्राप्त हुए ( नः ) हमारे ( कामम् ) मनोरथ को ( आपूपुरन्तु ) सब प्रकार से पूर्ण करें॥ ३॥

भावार्थ—अध्यापक उपदेशक और प्रजानायक जन को चाहिये कि वे सदा मनुष्य समाज का सुखमय जीवन बनाने के लिये शिक्षा संरक्षण देते रहें और प्रजाजन भी इन के अनुकूल आचरण करते रहें ॥ ३ ॥

**द्यावाभूमी अदिते त्रासीथां नो ये वां जज्ञुः सुजनिमान ऋष्वे ।**
**मा हेळे भूम वरुणस्य वायोर्मा मित्रस्य प्रियतमस्य नृणाम् ॥४॥**

द्यावां भूमी इति । अदिते । त्रासीथाम् । नः । ये । वाम् । जज्ञुः । सुजनिमानः । ऋष्वे इति । मा । हेळे । भूम । वरुणस्य । वायोः । मा । मित्रस्य । प्रियऽतमस्य । नृणाम् ॥ ४ ॥

सं० अन्वयार्थः—( अदिते ) अभिन्ने ( ऋष्वे द्यावाभूमी ) महत्यौ द्यावापृथिव्यौ–पूजनीयौ माता पितरौ "द्यौर्मे···पिता माता पृथिवी महीयम्" [ ऋ० १ । १६४ । ३३ ] ( नः ) अस्मान् ( त्रासीथाम् ) रक्षतम् ( ये ) ये जनाः ( वाम् ) युवाम् ( जज्ञुः ) जानन्ति–अनुजानन्ति ते ( सुजनिमानः ) सफलजन्मानः सन्ति ( नृणाम् ) मनुष्याणाम् ( वायोः–वरुणस्य ) गतिशीलस्य भ्रमणशीलस्योपदेशकस्य ( प्रियतमस्य–मित्रस्य ) अत्यन्तप्रियकारिणोऽध्यापकस्य ( हेळे ) क्रोधे विपरीताचरणे ( मा भूम ) न भवेम ॥ ४ ॥

भाषान्वयार्थ—( अदिते ) हे अभिन्न ( ऋष्वे–द्यावाभूमी ) पूजनीय माता और पिता ( नः ) हमें ( त्रासीथाम् ) सुरक्षित रक्खो ( ये ) जो जन ( वाम् ) तुम दोनों को ( जज्ञुः ) जानते हैं–तुम्हारी अनुज्ञा में रहते हैं वे ( सुजनिमानः ) सफल जन्म वाले–सफल जीवन वाले हैं ( नृणाम् ) मनुष्यों के ( वायोः–वरुणस्य ) गतिशील–भ्रमणशील उपदेशक के ( प्रियतमस्य–मित्रस्य ) अत्यन्त प्रियकारी अध्यापक के ( हेळे ) विरोध में–विपरीत आचरण में ( मा भूम ) मत होवें ॥ ४ ॥

भावार्थ—माता पिता के उपकारों को कभी न भूलना चाहिए । उन की अनुमति में रहना तथा गुरुकुल में गुरू से और अन्यत्र उपदेशकों से शिक्षा एवं ज्ञान लाभ कर मानव जीवन सफल बनाना चाहिए ॥ ४ ॥

**प्र बाह्वा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन ।**
**आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा ॥५॥**

प्र । बाहवा । सिसृतम् । जीवसे । नः । आ । नः । गव्यूतिम् । उक्षतम् । घृतेन । आ । नः । जने । श्रवयतम् । युवाना । श्रुतम् । मे । मित्रावरुणा । हवा । इमा ॥ ५ ॥

सं० अन्वयार्थः—( युवाना ) मिश्रणामिश्रणस्वभावौ "यु मिश्रणामिश्रणयोः" ( [ अदादि० ] ( मित्रावरुणा ) अध्यापकोपदेशकौ ( नः ) अस्माकम् ( जीवसे ) जीवनाय ( बाहवा ) बाहू ( प्रसिसृतम् ) प्रसारयतम् ( नः ) अस्माकम् ( गव्यूतिम् ) गावो वाचो यन्ति यस्यां तां छात्रशालां परिषदं च "गौरिति वाङ्नाम" [ निघं० १ । ११ ] ( घृतेन ) ज्ञानप्रकाशकेन स्निग्धेन वचनेन च "घृ क्षरणदीप्त्योः" [ जुहो० ] ( आ-उक्षतम् ) समन्तात् सिञ्चतं पूरयतम्, अतः ( जने ) जनमात्रनिमित्तं जनसङ्घे वा जनेभ्यः ( आश्रवयतम् ) शास्त्राणि प्रवचनानि च सम्यक् श्रावयतम् ( मे ) मम ( इमा ) इमानि ( हवा ) हवानि निवेदनानि ( श्रुतम् ) शृणुतं स्वीकुरुतम् ॥ ५ ॥

भाषान्वयार्थ—( युवाना ) हमारे से मिलने वाले कदाचित् न मिलने वाले ( मित्रावरुणौ ) अध्यापक और उपदेशक जनो ! तुम ( नः ) हमारे ( जीवसे ) जीवन के लिये ( वाहवा ) अपनी भुजाओं को ( प्रसिसृतम् ) फैलाओ हमें अपनाओ ( नः ) हमारी ( गव्यूतिम् ) अध्यापन प्रवचनरूप वाणी की स्थली छात्रशाला को और सभा को ( घृतेन ) स्निग्ध ज्ञानप्रकाशक स्निग्ध प्रवचनामृत से ( आ-उक्षतम् ) समन्त रूप से सीञ्चो पूर दो ( जने ) जन मात्र के निमित्त या जनसंघ-जनों के लिये ( आश्रवयतम् ) शास्त्रों, प्रवचनों को सुनाओ ( मे ) मेरे ( इमा-हवा ) इन निवेदनों को ( श्रुतम् ) सुनो-स्वीकार करो ॥ ५ ॥

भावार्थ—छात्रशाला और सभास्थानों की स्थापना कर मनुष्यमात्र अध्यापकों और उपदेशकों से शिक्षा और सदुपदेश ग्रहण करे ॥ ५ ॥

**नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधन्तु ।**
**सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥**

मूल संहिता में (नू) है

नु । मित्रः । वरुणः । अर्यमा । नः । त्मने । तोकाय । वरिवः । दधन्तु । सुऽगा । नः । विश्वा । सुऽपथानि । सन्तु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

**सं० अन्वयार्थः**—( मित्रः ) अध्यापकः ( वरुणः ) उपदेशकः ( अर्यमा ) ज्ञानदाता विद्यासूर्य आचार्यः ( नः ) अस्माकम् ( त्मने ) आत्मने ( तोकाय ) अपत्याय "तोक इत्यपत्यनाम" [ निघं० २ । २ ] ( वरिवः ) विद्याधनम् "वरिवो धननाम" [ निघं० २ । १० ] ( नु ) अवश्यम् ( दधन्तु ) धारयन्तु-प्रयच्छन्तु ( नः ) अस्माकं जीवनानि ( विश्वा ) सर्वाणि ( सुगा ) सुगमनानि ( सुपथानि ) शुभपथानि धर्मपरायणानि ( सन्तु ) भवन्तु ( यूयम् ) यूयं सर्वे ( नः ) अस्मान् ( सदा ) सर्वदा ( स्वस्तिभिः ) कल्याणवचनप्रवचनादेशैः ( पात ) रक्षत ॥ ६ ॥

भाषान्वयार्थ—( मित्रः ) अध्यापक ( वरुणः ) उपदेशक ( अर्यमा ) ज्ञानदाता विद्या सूर्य आचार्य ( नः ) हमारे ( त्मने ) आत्मा के लिये ( तोकाय ) सन्तान के लिये ( वरिवः ) विद्या ज्ञान धन को ( नु ) अवश्य ( दधन्तु ) प्रदान करे ( नः ) हमारे जीवन ( विश्वा ) सारे ( सुगा ) सुगति वाले सरल ( सुपथानि ) सुपथ वाले धर्म पथ पर चलने वाले ( सन्तु ) होवें ( यूयम् ) तुम सब ( नः ) हमारी ( सदा ) सर्वदा ( स्वस्तिभिः ) कल्याण-वचन प्रवचन आदेशों से ( पात ) रक्षा करो ॥ ६ ॥

भावार्थ—अपने लिये और अपनी सन्तानों को श्रेष्ठ धार्मिक सुपथ पर चलने वाले बनाने के लिये अध्यापकों उपदेशकों और उत्तम आचार्य के शिक्षण प्रवचन आदेशों पर चलना चाहिए ॥ ६ ॥

# त्रिषष्ठितमं सूक्तम्

ऋषिः—१—६ वसिष्ठः

देवता—१—१/५ सूर्यः २/५—६ मित्रा वरुणौ।

छन्दः—त्रिष्टुप्।

**उद्वेति सुभगो विश्वचक्षाः साधारणः सूर्यो मानुषाणाम्।**
**चक्षुर्मित्रस्य वरुणस्य देवश्चर्मेव यः समविव्यक्तमांसि ॥ १ ॥**

उत्। ऊँ इति। एति। सुऽभगः। विश्वऽचक्षाः। साधारणः। सूर्यः। मानुषाणाम्। चक्षुः। मित्रस्य। वरुणस्य। देवः। चर्मऽइव। यः। सम्ऽअविव्यक्। तमांसि ॥ १ ॥

**सं० अन्वयार्थः**—(मानुषाणां सूर्यः) मानुषाणामिति निर्धारणे षष्ठी। यः खलु मनुष्येषु विद्यासूर्य आचार्यः (साधारणः) साधारण-भावेन सर्वमान्यः (सुभगः) सु शोभनो भगो यस्मात् स सौभाग्य-साधकः "क्त्वादयश्च" [अष्टा० ६।२।११७] इत्युत्तरपदाद्युदात्तः (विश्वचक्षाः) सर्वज्ञानविषयस्य प्रकाशको वक्ता वा (उद्वेति) उत्कृष्टत्वं गच्छति (देवः) स देवो विद्वान् (मित्रस्य वरुणस्य चक्षुः) अध्यापकस्य तथोपदेशकस्य ज्ञानदर्शकः (यः) यश्च (तमांसि) अज्ञान भ्रान्तिमूढत्वान्धकारान् (चर्म इव) चर्माणि-आवरणानीव (सम्-अविव्यक्) सम्यक् पृथक् करोति-संवेष्टयति वा ॥ १ ॥

**भाषान्वयार्थ**—(मानुषाणां सूर्यः) मनुष्यों में विद्यासूर्य आचार्य (साधारण) साधारण भाव से सर्वमान्य (सुभगः) सौभाग्यसाधक (विश्वचक्षाः) सब ज्ञान विषय का प्रकाशक या वक्ता (उद्वेति) उत्कर्ष को प्राप्त होता है (मित्रस्य) अध्यापक का (वरुणस्य) उपदेशक का (चक्षुः) ज्ञानदर्शक (यः) जो (तमांसि) अज्ञान भ्रान्ति मूढत्व अन्धकारों को (चर्म-इव) चर्म आवरणों जैसों को (सम्-अविव्यक्) सम्यक् पृथक् कर देता है या लपेट देता है ॥ १ ॥

**भावार्थ**—विद्यासूर्य आचार्य सामान्य रूप से सब मनुष्यों का माननीय है और विशेषत; अध्यापक उपदेशक तैयार करके मानव समाज के अज्ञान भ्रान्ति आदि अन्धकार को दूर करता है। उसे ये दो प्रकार के शिष्य बनाने

चाहिए–विद्याप्रचारक और धर्मप्रचारक कहा भी है "ऋतं" वदिष्यामि सत्यं वदिष्यामि ब्रह्म वदिष्यामि [ वाराह गृहसूत्र—१३ ] ॥ १ ॥

**उ॒द्वे॑ति प्र॒स॒वी॒ता जना॑नां म॒हान्के॒तुर॑र्ण॒वः सूर्य॑स्य ।**
**स॒मा॒नं च॒क्रं प॑र्या॒ विवृ॒त्सन्यदे॑त॒शो वह॑ति धू॒र्षु यु॒क्तः ॥ २ ॥**

उत् । ऊँ इति । एति । प्रऽसविता । जनानाम् । महान् । केतुः । अर्णवः । सूर्यस्य । समानम् । चक्रम् । परिऽआविवृत्सन् । यत् । एतशः । वहति । धूःऽसु । युक्तः ॥ २ ॥

**सं० अन्वयार्थः**—( जनानां प्रसविता ) मनुष्याणां प्रेरकः ( महान् केतुः ) महान् ज्ञानदाता ( अर्णवः ) ज्ञानसागरः ( सूर्यः ) सूर्यः–विद्यासूर्य आचार्यः, तस्य ( चक्रं समानम् ) ज्ञानरूपचक्रं सर्वार्थमेकरूपं सर्वेभ्यो निष्पक्षं कल्याणकरम् ( पर्याविवृत्सन् ) पर्यावर्तते सर्वत्र पृथिवीपृष्ठे ( यत् ) यथा ( एतशः–धूर्षु युक्तः–वहति ) अश्वो रथस्य धूर्षु युक्तो रथं वहति तथायं विद्यासूर्य आचार्यो मानवानां ज्ञानरथं वहति चालयति ॥ २ ॥

भाषान्वयार्थ—( जनानां प्रसविता ) मनुष्यों का प्रेरक ( महान् केतुः ) महान् ज्ञानदाता ( अर्णवः ) ज्ञानसागर ( सूर्यस्य ) विद्यासूर्य आचार्य है, उस का ( चक्रं समानम् ) ज्ञानरूप चक्र समान है निष्पक्ष सबके कल्याणार्थ ( पर्याविवृत्सन् ) सर्वत्र घूमता है—प्राप्त होता है ( यत् ) जैसे ( एतशः–धूर्षु युक्तः–वहति ) रथ का घोड़ा धुरों में युक्त हुआ रथ को वहन करता है ऐसे विद्यासूर्य आचार्य मानवों के ज्ञानरथ को वहन करता है ॥ २ ॥

भावार्थ—विद्यासूर्य आचार्य का ज्ञान निष्पक्ष सब के कल्याणार्थ समान होता है वह मनुष्यों के ज्ञान रथ को सर्वत्र चलाता है ॥ २ ॥

**वि॒भ्राज॑मान उ॒षसा॑मु॒पस्था॑द्रे॒भैरुदे॑त्यनुम॒द्यमा॑नः ।**
**ए॒ष मे॑ दे॒वः स॑वि॒ता च॑च्छन्द॒ यः स॒मा॒नं न प्र॑मि॒नाति॒ धाम॑ ॥ ३ ॥**

विऽभ्राजमानः । उषसाम् । उपऽस्थात् । रेभैः । उत् । एति । अनुऽमद्यमानः । एषः । मे । देवः । सविता । चच्छन्द । यः । समानम् । न । प्रऽमिनाति । धाम ॥ ३ ॥

**सं० अन्वयार्थः**—( उषसाम् ) ज्ञानज्योतिषाम् ( उपस्थात् ) पीठात्-पीठे "सप्तम्यर्थे पञ्चमी" व्यत्ययेन ( विभ्राजमानः ) विशेषेण प्रकाशमानः स विद्यासूर्य आचार्य ( रेभैः ) अर्चकैः शिष्यैः "रेभति अर्चतिकर्मा" [ निघं० ३ । १४ ] ( अनुमद्यमानः ) अन्वर्च्यमानः सेव्यमानः "मदति अर्चतिकर्मा [ निघं० ३ । १४ ] ( उदेति ) तत्पीठादुत्तिष्ठति ( एषः-सविता-देवः ) अयं ज्ञानप्रेरक आचार्यदेवः ( मे चच्छन्द ) अस्माकं श्रवणकामं छन्दयति पूरयति ( यः समानं धाम न प्रमिनाति ) यः खलु सर्वेषां समानं विद्यास्थानं ज्ञानस्थानं न हिनस्ति-नावरोधयति न सङ्कोचयति "मिनाति-बधकर्मा" [ निघं २ । १६ ] ॥ ३ ॥

भा० अन्वयार्थ—( उषसाम् ) ज्ञानज्योतियों के ( उपस्थात् ) पीठ पर-गद्दी पर ( विभ्राजमानः ) विशेष प्रकाशमान-विराजमान वह विद्यासूर्य आचार्य ( रेभैः ) अपने अर्चक शिष्यों द्वारा ( अनुमद्यमानः ) अर्चित हुआ—सेवा सम्मान पाया हुआ ( उदेति ) उस विद्यापीठ-ज्ञानपीठ से उठता है ( एषः-सविता देवः ) यह ज्ञानप्रेरक आचार्यदेव ( मे चच्छन्द ) हमारी श्रवण कामना को पूरा करता है ( यः समानं धाम न प्रमिनाति ) जो सब के समान विद्यास्थान ज्ञानस्थान को नहीं नष्ट करता—नहीं अवरुद्ध करता है—नहीं सङ्कुचित करता है ॥ ३ ॥

भावार्थ—ज्ञानज्योतियों में विराजमान विद्यासूर्य आचार्य यद्यपि अनेक शिष्यों द्वारा घिरे हुए सेवा पाए हुए भी लोकहित के लिये अपने विद्यास्थान को सब के लिबे समान लाभप्रद बनाता है किसी के लिये बन्द नहीं करता, उस के ज्ञानग्रहण करने में सब का अधिकार है ॥ ३ ॥

**दिवो रुक्म उरुचक्षा उदेति दूरेअर्थस्तरणिर्भ्राजमानः ।**
**नूनं जनाः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि ॥ ४ ॥**

दिवः । रुक्मः । उरुऽचक्षाः । उत् । दूरेऽअर्थः । तरणिः । भ्राजमानः । नूनम् । जनाः । सूर्येण । प्रऽसूताः । अयन् । अर्थानि । कृणवन् । अपांसि ॥ ४ ॥

**सं० अन्वयार्थः**—( दिवः-रुक्मः ) विज्ञानस्य "दिवं विज्ञानम्" [ ऋ० १ । २२ । २० दयानन्दः ] प्रकाशयिता ( उरुचक्षाः ) महान्

वक्ता "चक्षिङ् व्यक्तायां वाचि" [ अदादि० ] ततोऽसुन् उरुपूर्वपदेन समासः कर्मधारयः" ( दूरे-अर्थः ) दूरादतिदूरे ज्ञानविषयो यस्य स दूरदर्शी ( तरणिः ) तारकः-अज्ञानसागरात् तारयिता पारयिता ( भ्राजमानः ) ज्ञानेन प्रकाशमानः ( उदेति ) ज्ञानप्रसाराय खलूद्यतो भवति ( नूनम् ) निश्चयेन ( सूर्येण प्रसूताः-जनाः ) विद्यासूर्येणाचार्येण प्रेरिता जनाः ( अर्थानि-अयन् ) अर्थनीयानि प्रार्थनीयानि ज्ञानानि प्राप्नुवन्ति ( अपांसि-कृणवन् ) तदुपदेशमनुसृत्य कर्माणि कुर्वन्ति "अपः कर्मनाम [ निघं २ । १ ] ॥ ४ ॥

भा० अन्वयार्थ—( दिव-रुक्मः ) विज्ञान का प्रकाशक (उरुचक्षाः) महान् व्याख्याता-वक्ता ( दूरे-अर्थः ) दूर से दूर ज्ञान-विषय वाला-दूरदर्शी ( तरणिः ) मनुष्यों को अज्ञानसागर से तराने वाला पार कराने वाला ( भ्राजमानः ) ज्ञान से प्रकाशमान ( उदेति ) ज्ञानप्रसार के लिये उद्यत होता है ( नूनम् ) निश्चय ( सूर्येण प्रसूताः-जनाः ) विद्यासूर्य आचार्य से प्रेरित हुए जन ( अर्थानि-अयन् ) अर्थनीय प्रार्थनीय ज्ञानों को प्राप्त करते हैं ( अपांसि कृणवन् ) उसके उपदेश के अनुसार कर्मों को करने लगते है ॥ ४ ॥

भावार्थ—विज्ञानप्रकाशक महान् वक्ता दूरदर्शी विद्यासूर्य आचार्य मनुष्यों को अज्ञानसागर से तराने वाला जब ज्ञान का उपदेश करता है तब श्रोता जन अभीष्ट ज्ञानों का श्रवण कर तदनुसार कर्म करते हैं, अन्यथा अन्ध परम्परा में गिरते हैं ॥ ४ ॥

**यत्रा चक्रुरमृता गातुमस्मै श्येनो न दीयन्नन्वेति पाथः ।**
**प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः ॥ ५ ॥**

यत्र । चक्रुः । अमृताः । गातुम् । अस्मै । श्येनः । न । दीयन् । अनु । एति । पाथः । प्रति । वाम् । सूरे । उत्ऽइते । विधेम । नमःऽभिः । मित्रावरुणा । उत । हव्यैः ॥ ५ ॥

**सं० अन्वयार्थः**—( अस्मै ) एतस्मै विद्यासूर्याय-आचार्याय ( अमृताः ) न मृतं मरणं जन्ममरणं यैस्तथाभूता जीवनप्राणा यावज्जीवनं ज्ञानधर्माध्यात्मविषयकाः शिवसङ्कल्पभाविताः प्राणाः, उक्तं यथा-"आचार्योऽन्तेवासिनां योगमिच्छन् जपति, ऋतं वदिष्यामि, सत्यं वदिष्यामि, ब्रह्म वदिष्यामि" [ वाराह गृह्यसूत्र—१३ ] "प्राणा वा अमृताः" [ तै० आ० ५ । ६ । १० ] ( यत्र गातु चक्रुः ) अस्मिन्

मोक्षधाम्नि मार्गं कृतवन्तस्तेन सः ( श्येनः-दीयन् न पाथः-अन्वेति ) शंसनीय गतिको भासपक्षी गच्छन् "दीयति गतिकर्मा" [ निघं- २। १४ ] अन्तरिक्षमानुकूल्येन प्राप्नोति तद्वत् तन्मोक्षधाम प्राप्नोति "यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्। तं तं हि याति कौन्तेय ! सदा तद्भवभावितः ॥" [ गीता- ] ( मित्रावरुणा ) हे- अध्यापकोपदेशकौ यस्य विद्यासूर्यस्याचार्यस्य युवां शिष्यौ ( वाम् ) ताभ्यां युवाभ्याम् ( नमोभिः-उत्-हव्यैः ) विविधान्नभोजनैः "नमः- अन्ननाम" [ निघं० २। ७ ] अपि चोपहारैरावश्यकदातव्यपदार्थैः (प्रति-उदिते सूरे विधेम ) उदिते सूर्यप्रति-उदितं सूर्यं प्रति-दिनं दिनं प्रति-प्रतिदिनमिति यावत् परिचरेम सेवेमहि ॥ ५ ॥

भा० अन्वयार्थ—( अस्मै ) इस विद्यासूर्य आचार्य के लिये (अमृताः) इस के मरणत्राता जीवन प्राण जीवन भर किए ज्ञान धर्म अध्यात्म विषयक, शिवशङ्कल्प से भावित ( यत्र गातुं चक्रुः ) जिस मोक्षधाम में मार्ग को सम्पन्न कर चुके उस से वह ( श्येनः-दीयन् न पाथः-अन्वेति ) शंसनीय गतिमान् बाज पक्षी गति करता हुआ—उड़ता हुआ अन्तरिक्ष को अनुकूल रूप में प्राप्त करता है उसी भाँति उस मोक्षधाम को प्राप्त करता है ( मित्रावरुणा ) हे अध्यापक और उपदेशक ! तुम जिस विद्यासूर्य आचार्य के शिष्य हो ( वाम् ) उन तुम दोनों के लिए ( नमोभिः-उत्-हव्यैः ) विविध अन्नों से उपहारों-आवश्यक पदार्थों से ( प्रति-उदिते सूरे विधेम ) प्रति उदय हुए सूर्य- प्रतिदिन सेवा करें—करते रहें ॥ ५ ॥

भावार्थ—विद्यासूर्य आचार्य को उस के जीवन प्राण जीवन भर किए ज्ञान धर्म अध्यात्म सम्बन्धी शिवसङ्कल्प मोक्षधाम में ले जाते हैं ऐसे आचार्य के शिष्य अध्यापक उपदेशकों से शिक्षा लेते हुए उनका प्रतिदिन उत्तम अन्नों भोजनों तथा उपहारों से स्वागत करना चाहिए ॥ ५ ॥

**नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधन्तु ।**
**सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥**

नु । मित्रः । वरुणः । अर्यमा । नः । त्मने । तोकाय । वरिवः । दधन्तु । सुऽगा । नः । विश्वा । सुऽपथानि । सन्तु । यूयम् । पात । स्वस्तिऽभिः । सदा नः ॥ ६ ॥

सं० अन्वयार्थः—( मित्रः ) अध्यापकः ( वरुणः ) उपदेशकः ( अर्यमा ) ज्ञानदाता विद्यासूर्य आचार्यः ( नः ) अस्माकम् ( त्मने ) आत्मने ( तोकाय ) अपत्याय "तोक इत्यपत्यनाम" [ निघं०-२ । २ ] ( वरिवः ) विद्याधनम् "वरिवो धननाम" [ निघं० २ । १० ] ( नु ) अवश्यम् ( दधन्तु ) धारयन्तु-प्रयच्छन्तु ( नः ) अस्माकं जीवनानि ( विश्वा ) सर्वाणि ( सुगा ) सुगमनानि ( सुपथानि ) शुभपथानि-धर्मपरायणानि ( सन्तु ) भवन्तु ( यूयम् ) यूयं सर्वे ( नः ) अस्मान् ( सदा ) सर्वदा ( स्वस्तिभिः ) कल्याणवचनप्रवचनादेशैः ( पात ) रक्षत ॥ ६ ॥

भा० अन्वयार्थ—( मित्रः ) अध्यापक ( वरुणः ) उपदेशक ( अर्यमा ) ज्ञानदाता विद्यासूर्य आचार्य ( नः ) हमारे ( त्मने ) आत्मा के लिये ( तोकाय ) सन्तान के लिये ( वरिवः ) विद्याधन को ( नु ) अवश्य ( दधन्तु ) प्रदान करें ( नः ) हमारे जीवन ( विश्वा ) सारे ( सुगा ) सुगतिवाले-सरल ( सुपथानि ) सुपथ वाले-धर्म पथ पर चलने वाले ( सन्तु ) होवें ( यूयम् ) तुम सब ( नः ) हमारी ( सदा ) सर्वदा ( स्वस्तिभिः ) कल्याणवचन प्रवचन आदेशों से ( पात ) रक्षा करो ॥ ६ ॥

भावार्थ—अपने को और अपनी सन्तान को श्रेष्ठ धार्मिक सुपथ पर चलने वाले बनाने के लिये अध्यापकों उपदेशकों और उत्तम आचार्य के शिक्षण प्रवचन आदेशों पर चलना चाहिए ॥ ६ ॥

---

# चतुष्षष्टितमं सूक्तम्

ऋषि: १–५ वसिष्ठः ।

देवता—मित्रावरुणौ ।

छन्दः—१, २, ३४ त्रिष्टुप् । ५-विराट् त्रिष्टुप् ।

**दिवि क्षयन्ता रजसः पृथिव्यां प्र वां घृतस्य निर्णिजो ददीरन् ।**
**हव्यं नो मित्रो अर्यमा सुजातो राजा सुक्षत्रो वरुणो जुषन्त ॥ १ ॥**

दिवि । क्षयन्ता । रजसः । पृथिव्याम् । प्र । वाम् । घृतस्य । निःऽनिर्जः । ददीरन् । हव्यम् । नः । मित्रः । अर्यमा । सुऽजातः । राजा । सुऽक्षत्रः । वरुणः । जुषन्त ॥ १ ॥

**सं० अन्वयार्थः**—( दिवि-पृथिव्यां क्षयन्ता ) द्युलोकविज्ञाने "दिवो विज्ञानयुक्तस्य [ ऋ० १ । ११७ । १३ दयानन्दः ] पृथिवीलोकविद्यायाम्" "पृथिव्या भूगर्भविद्यया" [ यजु० १५ । ६ दयानन्दः ] निवसन्तौ रममाणौ "क्षयन्तम् निवसन्तम्" [ यजु० १२ । ११० दयानन्दः ] "छान्दसो विकरण व्यत्ययः" मित्रावरुणौ-अध्यापकोपदेशकौ ( वाम् ) युवाभ्याम्-युष्मदर्थे ( रजसः घृतस्य निर्णिजः ) रञ्जनात्मकस्य मनोरञ्जनकारिण आवश्यकपदार्थस्य "भुजिरञ्जिभ्यां कित्-असुन्" [ उणा-४ । २१७ ] तथा घृतमयस्य स्निग्धपाकस्य विविधरूपाणि सेवनीयानि वस्तूनि "निर्णिक्-रूप नाम" [ निघं० ३ । ७ ] ( ददीरन् ) दीयन्ते "कर्मणि कर्तृ प्रत्ययो व्यत्ययेन" अथ "परोक्षकृतमुच्यते" ( मित्रः ) अध्यापकः ( वरुणः ) उपदेशकः ( सुजातः ) सर्वविद्यासम्पन्नः सुप्रसिद्धः ( राजा ) राजमानो विद्याक्षेत्रस्य स्वामी ( सुक्षत्रः ) शोभनौजः शोभनौजस्वी "ओजः क्षत्रम्" [ तै० ५ । ३ । ४ । २ ] ( अर्यमा ) विशिष्टज्ञानदाता विद्यासूर्य आचार्यः ( नः-हव्यं जुषन्त ) अस्माकं निवेदनं प्रीणन्तु ॥ १ ॥

**भा० अन्वयार्थ**—( दिवि ) द्युलोक सम्बन्धी विज्ञान में ( पृथिव्याम् ) पृथिवीलोकविषयक विद्या में ( क्षयन्ता ) निवास-रमण करते हुए मित्र, वरुण-अध्यापक, उपदेशक ( वाम् ) तुम्हारे लिये ( रजसः-घृतस्य निर्णिजः )

रञ्जनात्मक-मनोरञ्जनकारी आवश्यक पदार्थ के तथा घृतमय स्निग्ध पाक के विविध रूप-सेवनीय वस्तुएँ ( ददीरन् ) दी जाती हैं ( मित्रः ) अध्यापक ( वरुणः ) उपदेशक ( सुजातः-राजा सुक्षत्रः-अर्यमा ) सुप्रसिद्ध विद्याक्षेत्र का स्वामी शोभन ओजवाला विशिष्ट ज्ञानदाता विद्यासूर्य आचार्य ( नः-हव्यं जुषन्तु ) हमारे निवेदन को प्रसन्न करो-पसन्द करो-पूरण करो ॥ १ ॥

**भावार्थ**—द्युलोक के विज्ञान में और पृथिवीलोक की विद्या में रमण करने वाले अध्यापक उपदेशकों के लिये अनेक मनोरञ्जनकारी आवश्यक पदार्थ के तथा घृतमय स्निग्ध पाक की विविध खाद्य वस्तुएँ देनी चाहिए और अपना अभीष्ट निवेदन भी करना चाहिए ॥ १ ॥

**आ राजाना मह ऋतस्य गोपा सिन्धुपती क्षत्रिया यातमर्वाक् ।**
**इळां नो मित्रावरुणोत वृष्टिमव दिव इन्वतं जीरदानू ॥ २ ॥**

आ । राजाना । मह । ऋतस्य । गोपा । सिन्धुपती इति सिन्धुऽपती । क्षत्रिया । यातम् । अर्वाक् । इळाम् । नः । मित्रावरुणा । उत । वृष्टिम् । अव । दिवः । इन्वतम् । जीरदानू ॥२॥

**सं० अन्वयार्थः**—( राजाना ) विराजमानौ ( महः-ऋतस्य गोपा ) महतो ज्ञानस्य रक्षितारौ ( सिन्धुपती क्षत्रिया ) सिन्धूनां स्यन्दमानानां वाक्प्रवाहाणां स्वामिनावोजस्विनौ ( अर्वाक्-अयातम् ) अस्मदभिमुखं प्राप्नुतम् ( जीरदानू-मित्रावरुणा ) हे जीवनदातारौ-अध्यापकोपदेशकौ ! ( नः ) अस्मभ्यम् ( इळाम्-उत वृष्टिम् ) वाचम् "इळा वाक्नाम" [ निघं० १ । ११ ] अपि च ज्ञानभुक्तिम्-स्वधाम् "स्वधा वृष्टिः" [ जै० ३ । २७३ ] ( दिवः-इन्वतम् ) विज्ञानपीठात् प्रेरयतम् "इन्वति गतिकर्मा" [ निघं० २ । १४ ] ॥ १ ॥

**भा० अन्वयार्थ**—( राजाना ) हे विराजमान ( महः-ऋतस्य गोपा ) महान् ज्ञान के रक्षक ( सिन्धुपती क्षत्रिया ) स्यन्दमान वाणी प्रवाहों के स्वामी ओजस्वी ( अर्वाक्-आयातम् ) हमारी ओर आओ ( जीरदानू मित्रावरुणा ) हे जीवनदाता अध्यापक उपदेशक ( नः ) हमारे लिये ( इलाम् उत वृष्टिम् ) वाणी और ज्ञानस्वधा ज्ञानरूप पायस खीर को ( दिवः-इन्वतम् ) ज्ञान पीठ से प्रेरित करो ॥ २ ॥

**भावार्थ**—अध्यापक उपदेशक ओजस्वी ज्ञान के रक्षक तथा ज्ञान जीवन देने वाले हों । वे अपने ज्ञानपीठ से वाणी प्रवचन और ज्ञानमयी स्वादु पायस-खीर पहुंचाने वाले होते हैं ॥ २ ॥

मित्रस्तन्नो वरुणो देवो अर्यः प्र साधिष्ठेभिः पथिभिर्नयन्तु ।
ब्रवद्यथा न आदरिः सुदास इषा मदेम सह देवगोपाः ॥ ३ ॥

मित्रः । तत् । नः । वरुणः । देवः । अर्यः । प्र । साधिष्ठेभिः । पथिऽभिः । नयन्तु । ब्रवत् । यथा । नः । आत् । अरिः । सुऽदासे । इषा । मदेम । सह । देवऽगोपाः ॥ ३ ॥

**सं० अन्वयार्थः**—( मित्रः ) अध्यापकः ( वरुणः ) उपदेशकः ( देवः-अर्यः ) ज्ञानप्रकाशको ज्ञानपीठस्य स्वामी विद्यासूर्य आचार्यः "अर्यः स्वामिवैश्ययोः" [ अष्टा० ३ । १ । १०३ ] "अर्यः-अर्यमाः" [ सायणः ] ( तत् ) तस्मात् ( नः ) अस्मान् ( साधिष्ठेभिः पथिभिः-प्र-नयन्तु ) साधुतमैरत्यन्तकल्याणकरैर्मार्गैराचरणैः प्रकृष्टं नयन्तु ( यथा ) यतोहि ( आत् ) अनन्तरम् ( नः ) अस्माकं मध्ये सम्यगात्मानं समर्पयित्रेऽध्येतुकामाय जनाय ( अरिः-ब्रवत् ) स ईश्वरो ज्ञानेश्वरो विद्यासूर्य आचार्यः "ईश्वरोऽप्यरिः" [ निरु० ५ । ७ ] "अरिः-अर्यमा" [ सायणः ] वदति-ज्ञानमुपदिशति ( देवगोपाः ) देवा गोपा गोप्तारो येषां ते वयं युष्माभीरक्षिताः सन्तः ( इषा सह ) ज्ञानेन सह ( मदेम ) हृष्येमानन्दिता भवेम ॥ ३ ॥

**भा० अन्वयार्थ**—( मित्रः ) अध्यापक ( वरुणः ) उपदेशक ( देवः-अर्यः ) ज्ञानप्रकाशक ज्ञानपीठ का स्वामी विद्यासूर्य आचार्य ( तत् ) जिस से ( नः ) हमें ( साधिष्ठेभिः-पथिभिः-प्र-नयन्तु ) अत्यन्त कल्याणकारी आचरणों-मार्गों द्वारा प्रकृष्ट रूप से ले जाते हैं ( यथा ) जैसे ( आत् ) अनन्तर-तुरन्त ( नः सुदासे ) हमारे मध्य में से सम्यक् अपने को समर्पित करने वाले सेवा परायण ज्ञानग्रहण करने वाले के लिये ( अरि-ब्रवत् ) वह ज्ञानेश्वर विद्यासूर्य आचार्य ज्ञान का उपदेश करता है ( देवगोपाः ) आप देव विद्वान् जन जिनके रक्षक हैं ऐसे हम-तुम्हारे द्वारा रक्षित हुए ( इषा सह ) ज्ञान के साथ ( मदेम ) हर्षित होवें-आनन्दित होवें ॥ ३ ॥

**भावार्थ**—अध्यापक उपदेशक तथा ज्ञानस्वामी विद्यासूर्य आचार्य अतिकल्याणकारी आचरणों से अच्छे रूप में ले जाते हैं—संसारयात्रा कराते हैं, वे देव जन हमारे रक्षक हैं जब हम अपने को उनके छात्र की भाँति उनके प्रति आदर सेवा भाव से समर्पित कर देते हैं ॥ ३ ॥

यो वां गर्तं मनसा तक्षदेतमूर्ध्वां धीतिं कृणवद्धारयच्च ।
उक्षेथां मित्रावरुणा घृतेन ता राजाना सुक्षितीस्तर्पयेथाम् ॥४॥

यः । वाम् । गर्तम् । मनसा । तक्षत् । एतम् । ऊर्ध्वाम् । धीतिम् । कृणवत् । धारयत् । च । उक्षेथाम् । मित्रावरुणा । घृतेन । ता । राजाना । सुऽक्षितीः । तर्पयेथाम् ॥ ४ ॥

सं० अन्वयार्थः—( मित्रावरुणा ) हे अध्यापकोपदेशकौ ! ( यः ) यो जनो युवयोः ( गर्तं मनसा तक्षत् ) सभास्थाणु यत्र युवां गृणीथः-उपदिशथः "गर्तः सभास्थाणुर्गृणातेः" [ निरु० ३ । ५ ] मनसा नतु हस्ताभ्यां परिष्करोति किन्तु मनसा-विचारयन् निश्चिनोति तथा ( एतम्-ऊर्ध्वां धीतिं-कृणवत्-धारयत च ) इयं खलूर्ध्वां प्रज्ञां प्रति "ऋतस्य धीतिः ऋतस्य प्रज्ञा" [ निरु० १० । ४० ] करोति विवेचयति अपि धारयति स्थिरीकरोति ( ता राजाना ) तौ राजमानौ ज्ञानप्रकाशकौ युवाम् ( घृतेन-उक्षेथाम् ) ज्ञानजन्येन दिव्येन मधुना "घृतं वै देवानां मधु" [ काठ० २६ । ३ ] सिञ्चथः, एवं ( सुक्षितीः-तर्पयेथाम् ) शोभनभूमिवतीर्मानवप्रजाः ज्ञानघृतेन तर्पयथः ॥ ४ ॥

भा० अन्वयार्थ—( मित्रावरुणा ) हे अध्यापक उपदेशक ( यः ) जो मनुष्य ( वाम् ) तुम्हारे ( गर्तं मनसा तक्षत् ) सभामञ्च को जहां कि तुम उपदेश करते हो उसे हाथों से नहीं किन्तु अपने मन से परिष्कृत करता है ( एतम्-ऊर्ध्वां धीतिं कृणवत् ) इसे ऊंची बुद्धि के प्रति समर्पित करता है, बुद्धि से विवेचित करता है ( च ) और ( धारयत् ) आत्मा में धारण करता है, उसको ( ता राजाना ) वे तुम दोनों ज्ञान प्रकाशमान ( घृतेन-उक्षेथाम् ) ज्ञानजन्य मधु से सींचते हो । एवं ( सुक्षितीः तर्पयेथाम् ) शोभन भूमिवाली मानव प्रजा को ज्ञानामृत से तृप्त करते हो ॥ ४ ॥

भावार्थ—अध्यापक उपदेशक के ज्ञान विषय को जो मन से विचारता है बुद्धि से विवेचन करता है आत्मा में धारण करता है वह जन ज्ञानमधु से भरपूर हो जाता है । ऐसे ही अच्छे मान जन भी उनके ज्ञान से तृप्त हो जाते हैं ॥ ४ ॥

एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि ।
अविष्टं धियो जिगृतं पुरंधी यूयं पात स्वस्तिभिः सदा नः
॥ ५ ॥

एषः । स्तोमः । वरुण । मित्र । तुभ्यम् । सोमः । शुक्रः । न । वायवे । अयामि । अविष्टम् । धियः । जिगृतम् । पुरम्ऽधीः । यूयम् । पात स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

**सं० अन्वयार्थः**—( वरुण ) हे उपदेशक ! ( मित्र ) हे अध्यापक ! ( तुभ्यम् ) त्वदर्थम् ( एषः स्तोमः ) अयं स्तुतिसमूहः प्रशंसाभावः ( अयामि ) समर्प्यते ( वायवे न शुक्रः सोमः ) यथा निरतिशयज्ञानवते प्राणस्वरूपपरमात्मने "प्राणो वै वायुः" [ तै० सं० २ । १ । १ । ५ ] "अनन्तबलत्वसर्वधातृत्वाभ्यां परमेश्वरो वायुशब्द वाच्यः" [ यजु० ३२ । १ दयानन्दः ] "वायवाहि दर्शतेमा सोमा अरङ्कृताः" [ ऋ० १ । २ । १ ] निर्मलः सोम उपासनारसः समर्प्यते "यथा देवे पराभक्ति र्यथा देवे तथा गुरौ" [ श्वेताश्वेतार-उपनिषदि ] ( धियः-अविष्टम् ) कर्माणि सेवाकर्माणि "धीः कर्म नाम" [ निघं० २ । १ ] युवां प्रीणीतम्–अनुकूलानि मन्यथाम् ( पुरन्धीःजिगृतम् ) बहुविधबुद्धीः "पुरन्धि बहुधीः" [ निरु० ३ । १३ ] विज्ञानयुक्ताः कुरुतम्–विकासिनी कुरुतम् "गॄ विज्ञाने" [ चुरादि० ] छान्दसः प्रयोगः ( यूयं स्वस्तिभिः सदा नः पात ) यूयं कल्याणकरीभिरुक्तिभिः सदाऽस्मान् रक्षत ॥ ५ ॥

**भा० अन्वयार्थ**—( वरुण ) हे उपदेशक ( मित्र ) हे अध्यापक ( तुभ्यम् ) तेरे लिये ( एषः-स्तोमः ) यह स्तुति समूह ( अयामि ) समर्पित किया जा रहा है ( वायवे न शुक्रः सोमः ) जैसे निरतिशय ज्ञान वाले प्राण-स्वरूप परमात्मा के लिये निर्मल उपासनारस समर्पित किया जाता है ( धियः-अविष्टम् ) सेवा कर्मों को पसन्द करो अनुकूल मानो ( पुरन्धीः-जिगृतम् ) बहुत प्रकार की बुद्धियों को विज्ञानमय बनाओ—विकसित करो ( यूयं स्वस्तिभिः नः सदा पात ) तुम कल्याणकारी वाणियों द्वारा हमारी सदा रक्षा करो ॥ ५ ॥

**भावार्थ**—अध्यापक उपदेशक की बहुत प्रशंसा सम्मान सेवा करनी चाहिए जैसे निरतिशय ज्ञान वाले प्राणस्वरूप परमात्मा के लिये उपासना की जाती है क्योंकि वे हमारी बहुत प्रकार से बुद्धियों का विकास करते हैं ॥ ५ ॥

# पञ्चषष्टितमं सूक्तम्

ऋषिः—१—५ वसिष्ठः ।

देवता—मित्रावरुणौ ।

छन्दः १, ५ विराट् त्रिष्टुप् । २ त्रिष्टुप् । ३, ४ निचृत् त्रिष्टुप् ।

**प्रति॑ वां॒ सूर॒ उदि॑ते सू॒क्तैर्मि॒त्रं हु॑वे॒ वरु॑णं पू॒तद॑क्षम् ।**
**ययो॑रसु॒र्य१॒॑मक्षि॑तं॒ ज्येष्ठं॒ विश्व॑स्य॒ याम॑न्ना॒चिता॑ जिग॒त्नु ॥ १ ॥**

प्रति॑ । वा॒म् । सूरे॑ । उत्ऽइ॑ते । सु॒ऽउ॒क्तैः । मि॒त्रम् । हु॒वे॒ । वरु॑णम् । पू॒तऽद॑क्षम् । ययोः॑ । अ॒सु॒र्य॑म् । अक्षि॑तम् । ज्येष्ठ॑म् । विश्व॑स्य । याम॑न् । आ॒ऽचिता॑ । जि॒ग॒त्नु ॥ १ ॥

**सं० अन्वयार्थः**—( प्रति उदिते सूरे ) उदितं सूर्यं प्रति–प्रतिदिनमिति यावत् "सजूः सूर एतशेनेति सूर्यमेव प्रीणाति" [ मै० ३ । ४ । ४ ] ( सूक्तैः ) सुवचनैर्हेतुभिर्यतः सुवचनानि शृणुयामित्यर्थम् ( वां पूतदक्षं मित्रं वरुणं हुवे ) पवित्रज्ञानबलवन्तमध्यापकमुपदेशकञ्च युवामामन्त्रये ( ययोः–अक्षितं ज्येष्ठं जिगत्नु–असुर्यम् ) ययोरनश्वरं श्रेष्ठं जयशीलं मनोविकासकरं बलं "मनो वा असुरम्" [ जै० उ० ३ । ६ । ७ ] ( विश्वस्य यामन्–आचिता ) सर्वस्य मनुष्यमात्रस्य जीवनमार्गे यावध्यापकोपदेशकौ पूजनीयौ स्तः ॥ १ ॥

**भा० अन्वयार्थ**—( प्रति-उदिते सूरे ) प्रति उदित सूर्य,-प्रतिदिन ( सूक्तैः ) सुवचनों के श्रवण हेतु ( वां पूतदक्षं मित्रं वरुणं हुवे ) तुम दोनों पवित्र बल वाले अध्यापक उपदेशक को आमन्त्रित करता हूँ ( ययोः-अक्षितं ज्येष्ठं जिगत्नु-असुर्यम् ) जिन दोनों का अनश्वर श्रेष्ठ जयशील मनोविकास कारी बल है ( विश्वस्य यामन्-आचिता ) सब मनुष्यमात्र के जीवनमार्ग में ज्ञानार्थ पूजनीय हों ॥ १ ॥

भावार्थ—प्रतिदिन अध्यापक उपदेशक को आमन्त्रित कर उनसे अनश्वर श्रेष्ठ, सब दोषों पर जय पाने वाले मानसज्ञान को प्राप्त करना चाहिए। वे अध्यापक उपदेशक मानव के पूजनीय जीवनमार्गदर्शक हैं ॥ १ ॥

**ता हि देवानामसुरा तावर्या ता नः क्षितीः करतमूर्जयन्तीः ।**
**अश्याम मित्रावरुणा वयं वां द्यावा च यत्र पीपयन्नहा च ॥२॥**

ता । हि । देवानाम् । असुरा । तौ । अर्या । ताः । नः । क्षितीः । करतम् । ऊर्जयन्तीः । अश्याम । मित्रावरुणा । वयम् । वाम् । द्यावा । च । यत्र । पीपयन् । अहा । च ॥ २ ॥

**सं० अन्वयार्थः**—( ता हि ) तौ खलु ( देवानाम्-असुरा ) विद्वत्सु मध्ये मनोबलयुक्तौ "मनो वा असुरम्" [ जै० उ० ३ । ६ । ७ ] तद्वन्तौ "अकारोऽत्र मत्वर्थीयश्छान्दसः ( तौ-अर्या ) तौ च ज्ञानस्वामिनौ ( ता नः क्षितीः-ऊर्जयन्तीः करतम् ) तौ ह्यस्माकं वंशभूमीरोजस्विनीः कुरुतम् ( द्यावा च ) द्यावापृथिव्यौ ( अहा च ) अहोरात्रौ च ( पीपयन् ) उत्सहन्तेऽर्थात् स्वस्मिन् द्युलोकविज्ञाने पृथिवीलोकविषये-अह्नि वा रात्रौ वा ( यत्र ) यत्र कुत्रापि ( मित्रावरुणा वयम्-अश्याम ) हे अध्यापकोपदेशकौ ! वयं युवां प्राप्नुयाम ज्ञानग्रहणाय ॥ २ ॥

**भा० अन्वयार्थ**—( ता हि ) वे दोनों ( देवानाम्-असुरा ) विद्वानों के मध्य मनोबल वाले ( तौ-अर्या ) वे ज्ञान स्वामी ( ता नः क्षितीः-ऊर्जयन्तीः करतम् ) वे हमारी वंश भूमियों को ओजस्वी करें ( द्यावा च ) द्युलोक और पृथिवी लोक ( अहा च ) और दिन रात्रि ( पीपयन् ) उत्साहित करते हैं अर्थात अपने द्युलोक पृथिवी लोक विज्ञान में दिन में रात्रि में ( यत्र ) जहां कहीं भी ( मित्रावरुणा वयम्-अश्याम् ) अध्यापक उपदेश को हम प्राप्त करें ॥ २ ॥

**भावार्थ**—अध्यापक उपदेशक ज्ञान स्वामी हैं। मानव की वंशभूमि में प्रजाओं को तेजस्वी बनाने वाले हैं। वे द्युलोक पृथिवी लोक के विषय में दिन में रात्रि में भी जिज्ञासार्थ प्राप्त करने योग्य हैं ॥ २ ॥

**ता भूरिपाशावनृतस्य सेतू दुरत्येतू रिपवे मर्त्याय ।**
**ऋतस्य मित्रावरुणा पथा वामपो न नावा दुरिता तरेम ॥३॥**

ता । भूरिऽपाशौ । अनृतस्य । सेतू इति । दुरत्येतू इति दुःऽअत्येतू । रिपवे । मर्त्याय । ऋतस्य । मित्रावरुणा । पथा । वाम् । अपः । न । नावा । दुःऽइता । तरेम ॥ ३ ॥

सं० अन्वयार्थः—( मित्रावरुणा ) हे अध्यापकोपदेशकौ ! ( वाम् ) युवयोः ( ऋतस्य पथा ) सत्यज्ञानस्य मार्गेण ( अपः न नावा दुरिता तरेम ) नौकया नदीरिव दुरितानि पापाज्ञानानि पारयेम ( रिपवे मर्त्याय ) ज्ञानशत्रवे जनाय ( ता भूरिपाशौ ) तौ बहुपाश-बन्धनाविव न तौ कथमपि तमज्ञानबन्धनान्मुञ्चतः विमुञ्चतः ज्ञान-शत्रुः ताभ्यां बिभेति पाशवन्तौ ( अनृतस्य सेतू ) ज्ञानरहितस्य जनस्य बन्धनाविव स्तः ( दुरत्येतू ) दुःखेनातिक्रमणीयौ प्राप्यौ वा स्तः ॥ ३ ॥

भा० अन्वयार्थः—( मित्रावरुणा ) हे अध्यापक और उपदेशक ! ( वाम् ) तुम्हारे आदिष्ट ( ऋतस्य पथा ), सत्यज्ञान के मार्ग से ( अपः न नावा दुरिता तरेम ) नौका से नदियों की भांति पाप अज्ञानों को हम पार करें ( रिपवे मर्त्याय ) ज्ञान के शत्रुजन के लिये ( ता भूरिपाशौ ) वे बहुत पाश बन्धन वाले ही हैं । उसके अज्ञान पाश को रहते से ज्ञानशत्रु उक्त पाश वाले से डरता है ( अनृतस्य सेतू ) ज्ञानरहित के बान्धने वाले ही हैं ( दुरत्येतू ) दुःख से अतिक्रमण करने एवं प्राप्त होने वाले होते हैं ॥ ३ ॥

भावार्थः—अध्यापक उपदेशक के उपदेश से ज्ञानी पाप अज्ञान को पार कर सकते हैं । वे ज्ञानरहित जन के लिये तो बांधने वाले और दुष्प्राप्य हैं ॥ ३ ॥

आ नो मित्रावरुणा हव्यजुष्टिं घृतैर्गव्यूतिमुक्षतमिळाभिः ।
प्रति वामत्र वरमा जनाय पृणीतमुद्नो दिव्यस्य चारोः ॥ ४ ॥

आ । नः । मित्रावरुणा । हव्यऽजुष्टिम् । घृतैः । गव्यूतिम् । उक्षतम् । इळाभिः । प्रति । वाम् । अत्र । वरम् । आ । जनाय । पृणीतम् । उद्नः । दिव्यस्य । चारोः ॥ ४ ॥

सं० अन्वयार्थः—( मित्रावरुणा ) हे अध्यापकोपदेशकौ ! ( नः ) अस्माकम् ( हव्यजुष्टिम् ) हव्यानां ग्राह्याणां ज्ञानानां जुष्टिः सेवनं यस्यां तां संसदम् ( घृतेन ) ज्ञानामृतेन, तथा ( गव्यूतिम् ) गवां वाचामूतिर्यस्याः प्रगतिर्यस्यां तां पाठशालाम् ( इळाभिः ) वाग्भिः ( उक्षतम् ) सिञ्चतं पूरयतम् ( अत्र ) विद्यालयसमीपे ( वां दिव्यस्य चारोः—उद्नः ) युवयोर्दिव्यस्य श्रेष्ठस्य चरितव्यस्य सेवनीयस्य वा-

उदकस्येव ज्ञानप्रवाहस्य ( वरम् ) वरणीयं रसम् ( जनाय प्रति-अपृणीतम् ) जनमात्राय प्रवर्तयतम् ॥ ४ ॥

भा० अन्वयार्थ—( मित्रावरुणा ) हे अध्यापक और उपदेशक ! तुम दोनों ( नः ) हमारी ( हव्यजुष्टिम् ) ग्राह्यज्ञानों का सेवन जिसमें होता है उस संसद्-सभा को ( घृतेन ) ज्ञानामृत से, तथा ( गव्यूतिम् ) वाणियों की गति प्राप्ति जिसमें हो उस पाठशाला को ( इलाभिः ) वाणियों से ( उक्षतम् ) सींचो—भर दो ( अत्र ) विद्या और ज्ञान के पीठ-स्थान में ( वाम् ) तुम्हारे अपने ( दिव्यस्य चारोः-उद्नः ) दिव्य सुन्दर सेवनीय जल जैसे ज्ञान प्रवाह के ( वरम् ) वरणीय रस को ( जनाय प्रति-आ पृणीतम् ) जनमात्र के लिये पहुंचाओ ॥ ४ ॥

भावार्थ—अध्यापक उपदेशक पाठशालाओं में और सभास्थानों अध्यापन और उपदेश करें। उनके दिव्य सद्वचनरूप जलप्रवाह की भांति ज्ञानप्रवाह जनमात्र के लिये प्राप्त हों ॥ ४ ॥

**एष स्तोमो॑ वरुण मित्र॒ तुभ्यं॒ सोमः॑ शु॒क्रो न वा॒यवेऽया॑मि ।**
**अ॒वि॒ष्टं धियो॑ जिगृ॒तं पुर॑न्धीर्यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ५ ॥**

एषः । स्तोमः॑ । वरु॒ण । मित्र॑ । तुभ्य॑म् । सोमः॑ । शुक्रः । न । वा॒यवे॑ । अ॒या॒मि॒ । अ॒वि॒ष्टम् । धियः॑ । जि॒गृ॒तम् । पुर॑म्ऽधीः । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥ ५ ॥

सं० अन्वयार्थः—( वरुण ) हे-उपदेशक ! ( मित्र ) हे-अध्यापक ! ( तुभ्यम् ) त्वदर्थम् ( एषः-स्तोमः ) अयं स्तुतिसमूहः प्रशंसाभावः ( अयामि ) समर्प्यते ( वायवे न शुक्रः सोमः ) यथा निरतिशयज्ञानवते प्राणस्वरूपपरमात्मने "प्राणो वै वायुः" [ तै० सं० २ । १ । १ । ५ ] "अनन्तबलत्वसर्वधातृत्वाभ्यां परमेश्वरो वायुशब्द वाच्यः" [ यजु० ३२ । १ दयानन्दः ] "वायवायाहि दर्शतेमे सोमा अरङ्कृताः" [ ऋ० १ । २ । १ ] निर्मलः सोम उपासनारसः समर्प्यते "यथा देवे पराभक्ति र्यथा देवे तथा गुरौ" [ श्वेताश्वेतर उपनिषदि ] ( धियः-अविष्टम् ) कर्माणि सेवाकर्माणि "धीः कर्मनाम" [ निघं० २ । १ ] युवां प्रीणीतम्--अनुकूलानि मन्यथाम् ( पुरन्धीः--जिगृतम् ) बहु

विधबुद्धी: "पुरन्धि बहुधीः" [ निरु० ३ । १३ ] विज्ञानयुक्ताः कुरुतम्--विकासिनी कुरुतम् "गृ--विज्ञाने" [ चुरादि० ] छान्दसः प्रयोगः ( यूयं स्वस्तिभिः सदा नः पात ) यूयं कल्याणकारिणीभिरुक्तिभिः सदाऽस्मान् रक्षत ॥ ५ ॥

भा० अन्वयार्थं—( वरुण ) हे उपदेशक ( मित्र ) हे अध्यापक ! ( तुभ्यम् ) तेरे लिये ( एषः-स्तोमः ) यह स्तुतिसमूह ( अयामि ) समर्पित किया जा रहा है ( वायवे न शुक्रः सोमः ) जैसे निरतिशयज्ञानवाले प्राणस्वरूप परमात्मा के लिये निर्मल उपासनारस समर्पित किया जाता है ( धियः-अविष्टम् ) सेवा कर्मों को पसन्द करो, अनुकूल मानो ( पुरन्धीः-जिगृतम् ) बहुत प्रकार की बुद्धियों को विज्ञानमय बनाओ—विकसित करो ( यूयं स्वस्तिभिः नः सदा पात ) तुम कल्याणकारी वाणियों द्वारा हमारी सदा रक्षा करो ॥ ५ ॥

भावार्थ—अध्यापक उपदेशक की बहुत प्रशंसा सम्मान सेवा करनी चाहिए जैसे निरतिशय ज्ञानवाले प्राणस्वरूप परमात्मा के लिये उपासना की जाती है । क्योंकि वे हमारी बहुत प्रकार से बुद्धियों का विकाश करते हैं ॥ ५ ॥

---

अध्यापकोपदेशकयोस्तदाचार्यस्य च प्रकरणं समाप्तम् ॥

# षट्षष्टितमं सूक्तम्

ऋषिः—वसिष्ठः,

देवता—१–३, १७–१६ मित्रावरुणौ, ४–१३ आदित्याः, १४–१६ सूर्यः ।

छन्दः—१,२,४,६ निचृद् गायत्री । ३ विराड् गायत्री । ५, ६, ७, १८, १६ आर्षी गायत्री । १७ पादनिचृद् गायत्री । ८ स्वराड् गायत्री । १० निचृद् बृहती । ११ स्वराड् बृहती । १२ आर्षी स्वराड् बृहती । १३, १५ आर्षी भुरिग् बृहती । १४ आर्षी विराड् बृहती । १६ पुर उष्णिक् ।

प्र मित्रयोर्वरुणयोः स्तोमो न एतु शूष्यः । नमस्वान्तुविजातयोः ॥ १ ॥

प्र । मित्रयोः । वरुणयोः । स्तोमः । नः । एतु । शूष्यः । नमस्वान् । तुविऽजातयोः ॥ १ ॥

**सं० अन्वयार्थः**—( तुविजातयोः ) बहुषु ज्ञानविषयेषु प्रसिद्धयोः ( मित्रयोः-वरुणयोः ) परस्परं सहयोगापेक्षया प्रत्येकस्मिन् द्विवचनम् । मित्रावरुणयोरध्यापकोपदेशकयोः ( स्तोमः ) स्तुत्यं ज्ञानबलम् "स्तोमो वै देवेषु तरोनामासीत्" [ ता० ८ । ३ । ३ ] "तरो बलनाम" [ निघ० २ । ६ ] ( शूष्यः—नमस्वान् ) शूषे सुखे साधु शूष्यः "तत्र साधुर्यत्-प्रत्ययः । शूषं सुखनाम [ निघ० ३ । ६ ] अतिसुखदं च नमस्वान् यज्ञाधानं च "यज्ञो वै नमः" [ शत० २ । ४ । २ । २४ ] होमयज्ञस्याध्यात्मयज्ञस्य चाधानमाश्रयः ( नः प्र-एतु ) अस्मान् प्राप्नोतु ॥ १ ॥

भाषान्वयार्थः—( तुविजातयोः ) बहुज्ञानविषयों में प्रसिद्धों-( मित्रयोः-वरुणयोः ) अध्यापक उपदेशकों का ( स्तोमः ) ज्ञानबल ( शूष्यः—नमस्वान् ) अति सुखद और होमयज्ञ अध्यात्मयज्ञ का आधार ( नः प्र-एतु ) हमें प्राप्त हो ॥ १ ॥

भावार्थः—बहुत ज्ञानविषयों में प्रसिद्धिप्राप्त अध्यापक उपदेशकों का ज्ञानबल अतिसुखद और होमयज्ञ तथा अध्यात्मयज्ञ का आधार है उसके बिना होमयज्ञ और अध्यात्मयज्ञ नहीं बन सकता, वह ऐसा ज्ञानबल हमें उनसे प्राप्त करना चाहिए ॥ १ ॥

**या धारयन्त देवाः सुदक्षा दक्षपितरा । असुर्याय प्रमहसा ॥२॥**

या । धारयन्त । देवाः । सुऽदक्षा । दक्षऽपितरा । असुर्याय । प्रऽमहसा ॥ २ ॥

सं० अन्वयार्थः—( या ) याविध्यापकोपदेशकौ ( सुदक्षा ) शोभनज्ञानबलवन्तौ ( दक्षपितरा ) ज्ञानबलस्य पालकौ जनकौ वा ( प्रमहसा ) अतिप्रशंसनीयौ ( देवाः ) अध्येतारः श्रोतारश्च नूतनविद्वांसः ( असुर्याय ) ज्ञानबलप्रापणाय ( धारयन्त ) शिरसि धारयन्ति "बहुलं छन्दस्यमाङ्योगेऽपि" [ अष्टा० ६ । ४ । ७५ ] अडभावः सामान्यकाले च लङ् ] ततोऽधीत्य श्रुत्वा च सत्कुर्वन्ति ॥ २ ॥

भाषान्वयार्थः—( या ) जिन ( सुदक्षा ) शोभन ज्ञान बलवालों ( दक्षपितरा ) ज्ञानबल के मालक वा जनक ( प्रमहसा ) अति प्रशंसनीय अध्यापक उपदेशकों का ( देवाः ) पढ़ने वाले सुनने वाले नवविद्वान् जन ( असुर्याय ) ज्ञानबलप्राप्ति के लिये ( धारयन्त ) शिरोधार्य करते हैं उनसे अध्ययन श्रवण करके उनका सत्कार करते हैं ॥ २ ॥

भावार्थः—अध्यापक उपदेशकों से अध्ययन श्रवण कर जीवन में धारण करना और उनका सत्कार करना उचित ॥ २ ॥

**ता नः स्तिपा तनूपा वरुण जरितॄणाम् । मित्र साधयतं धियः ॥ ३ ॥**

ता । नः । स्तिऽपा । तनूऽपा । वरुण । जरितॄणाम् । मित्र । साधयतम् । धियः ॥ ३ ॥

सं० अन्वयार्थः—( ता ) तौ युवाम् ( वरुण मित्र ) हे उपदेशक ! अध्यापक ! ( नः-जरितॄणाम् ) अस्माकं ज्ञानयज्ञस्य यजमानानाम् "यजमानो जरिता" [ ऐ० ५। २। ८ ॥ ] ( स्तिपा ) हृदयगृहस्यहार्दिकभावस्य पातारौ, "नू इन्द्र ···· स्तिमिषु पत्नीः" [ ऋ० ७ । १६ । ११ ] ( तनूपा ) आत्मनोरक्षकौ "आत्मा वै तनूः" [ श० ६ । ७ । २ । ६ ] आत्मज्ञानोपदेशेन ( धियः साधयतम् ) बुद्धीः परिष्कुरुतम् ॥ ३ ॥

भाषान्वयार्थः—( ता ) वे तुम ( वरुणमित्र ) हे उपदेशक अध्यापक ! ( नः—जरितॄणाम् ) हम ज्ञानयज्ञ के यजमानों के ( स्तिपा ) हृदयगृह-हृदयगुहा-हार्दिक भाव के रक्षक अध्यापन तथा ( तनूपा ) आत्मरक्षक आत्माज्ञनोपदेश द्वारा हो ( धियः साधतम् ) बुद्धियों को परिष्कृत करो ॥ ३ ॥

भावार्थः—अध्यापक उपदेशक अध्यापन द्वारा हार्दिक भाव की और आत्मज्ञानोपदेश द्वारा आत्मस्वरूप की रक्षा करते हैं एवं बुद्धि को परिष्कृत करते हैं ॥ ३ ॥

**यदद्य सूर उदितेऽनागा मित्रो अर्यमा । सुवाति सविता भगः ॥ ४ ॥**

यत् । अद्य । सूरे । उत्ऽइते । अनागाः । मित्रः । अर्यमा । सुवाति । सविता । भगः ॥ ४ ॥

सं० अन्वयार्थः—( उदिते सूरे ) उदिते सूर्ये-प्रातःकाले ( यत् ) यत् ( अद्य ) अस्मिन् दिने, अस्मिन् जीवने ( अनागाः ) अपापः-पापरहितः ( मित्रः ) स्नेही मित्रभूतः ( अर्यमा ) कर्मफलदाता-न्यायकारी वा ( भगः सविता ) भजनीय उपासित उत्पादक परमात्मा ( सुवाति ) उपासकमैश्वर्यवन्तं करोति ॥ ४ ॥

भाषान्वयार्थः—( अनागाः ) पवित्र ( मित्रः ) स्नेही ( अर्यमा ) कर्मफलदाता ( भगः—सविता ) भजनीय उपासित उत्पादक परमात्मा ( उदिते सूरे ) प्रातःकाल में उपासित हुआ ( अद्य ) इस जीवन में ( सुवाति ) उपासक को ऐश्वर्यवान् बनाता है ॥ ४ ॥

भावार्थः—पवित्र मित्ररूप विविध सुखदाता भजनीय उत्पादक की प्रतिदिन उपासना करने से उपासक को इसी जीवन में ऐश्वर्यवान् बना देता है ॥ ४ ॥

**सुप्रावीरस्तु स क्षयः प्र नु यामन्त्सुदानवः । ये नो अंहोऽतिपिप्रति ॥ ५ ॥**

सुप्रऽअवीः । अस्तु । सः । क्षयः । प्र । नु । यामन् । सुऽदानवः । ये । नः । अंहः । अतिपिप्रति ॥ ५ ॥

सं० अन्वयार्थः—( सः क्षयः ) स निवासयिता ( सु प्रावीः प्र-अस्तु ) सम्यग् रक्षणकर्त्ता समर्थो भवतु ( ये सुदानवः ) ये शोभनविद्यादातारो विद्वांसः, ते ( यामन् ) संसारयात्रायाम् ( नु ) सद्यः ( नः ) अस्मान् ( अंहः—अतिपिप्रति ) पापमतिक्रामयन्ति पापात् तारयन्ति ॥ ५ ॥

भाषान्वयार्थः—( सः-क्षयः ) वह निवास-शरीर में वास देने वाला तथा मोक्ष में निवास देने वाला ( सुप्रावीः प्र-अस्तु ) सम्यक् रक्षणकर्त्ता होवे ( ये सुदानवः ) जो शोभनविद्या दाता विद्वान् हैं, वे ( यामन् ) संसारयात्रा में ( नु ) शीघ्र ( नः ) हमें ( अंहः—अतिपिप्रति ) पाप का अतिक्रमण कराते हैं ॥ ५ ॥

भावार्थः—शोभन विद्यादाता विद्वानों के ज्ञानदान से निष्पाप हो जावे तो परमात्मा संसार में और मोक्ष में अच्छा निवास देता है ॥ ५ ॥

उत स्वराजो अदितिरदब्धस्य व्रतस्य ये । महो राजान ईशते ॥ ६ ॥

उत । स्वऽराजः । अदितिः । अदब्धस्य । व्रतस्य । ये । महः । राजानः । ईशते ॥ ६ ॥

सं० अन्वयार्थः—( स्वराजः ) स्वाधारे विराजमानाया: स्वतः प्रमाणभूताया: ( अदितिः ) "अदितेः" विभक्ति-व्यत्ययः, अखण्डनीयवाचः श्रुतेः-वेदवाण्याः "अदितिर्वाङ् नाम [ निघ० १ । ११ । ] ( उत ) अपि वा ( महः—अदब्धस्य व्रतस्य ) महतोऽहिंसनीयस्याबाध्यस्य-उपासनाकर्मणः ( ये राजानः-ईशते ) यः खलु प्रकाशयिता स्वामित्वं भजते स परमात्मा शरण्यः "बहुवचनमादरार्थम्" ॥ ६ ॥

भाषान्वयार्थः—( स्वराजः ) स्वाधार पर विराजमान ( अदितिः—'अदितेः' ) वेदवाणी के ( उत ) तथा ( महः—अदब्धस्य व्रतस्य ) महान्-अहिंसनीय उपासनादि कर्म का ( ये राजानः—ईशते ) जो स्वामी या प्रकाशमान हुआ स्वामित्व करता है, वह परमात्मा शरण्य है ॥ ६ ॥

भावार्थः—स्वाधार राजमान वेदवाणी और उपासनकर्म के स्वामी परमात्मा सच्ची शरण है ॥ ६ ॥

प्रति वां सूर उदिते मित्रं गृणीषे वरुणम् । अर्यमणं रिशादसम्
॥ ७ ॥

प्रति । वाम् । सूरे । उत्ऽइते । मित्रम् । गृणीषे । वरुणम् । अर्यमणम् । रिशादसम् ॥ ७ ॥

सं० अन्वयार्थः—( मित्रं वरुणं वाम् ) संसारे कर्मकरणाय प्रेरयितारं स्वाश्रये वरयितारमुभयरूपं त्वां परमात्मानम्, तथा ( रिशादसम्—अर्यमणम् ) रिशां रेशयतामात्मनः पापदोषाणां हिंसकानामसितारमपसारयितारम् "रिशादसः रेशयदासिनः" [ निरु० ६ । १४ । ] अर्यमणं कर्मफलस्य भोगापवर्गरूपस्य दातारं परमात्मानम् ( उदिते सूरे प्रतिगृणीषे ) उदितं सूर्यं प्रति-प्रतिप्रातः-प्रतिदिनमिति यावत्—अर्चामि स्तौमि "गृणाति-अर्चतिकर्मा" [ निघ० ३ । १४ । ] ॥ ७ ॥

भाषान्वयार्थः—( मित्रं वरुणं वाम् ) संसार में कर्म करने को प्रेरित करने वाले स्वाश्रय में वरने वाले दोनों गुणरूप परमात्मा को, तथा ( रिशादसम्-अर्यमणम् ) आत्मा के पापदोषरूपों को निकाल, फेंक-भोग और मोक्ष कर्मफल देने वाले परमात्मा को ( उदिते सूरे प्रति गृणीषे ) प्रतिदिन सूर्य उदय होने पर (प्रतिदिन) स्तुति में लाता हूँ, उसकी स्तुति करता हूँ ॥ ७ ॥

भावार्थः—जीवात्मा को संसार में कर्म करणार्थ प्रेरित करने वाले मोक्षार्थ स्वाश्रय में वरने वाले तथा पाप दोषों को दूर करने वाले भोग और मोक्ष कर्मफल दाता परमात्मा की प्रतिदिन स्तुति प्रार्थना करनी चाहिए ॥७॥

राया हिरण्यया मतिरियमवृकाय शवसे । इयं विप्रा मेधसातये
॥ ८ ॥

राया । हिरण्यऽया । मतिः । इयम् । अवृकाय । शवसे । इयम् । विप्रा । मेधऽसातये ॥ ८ ॥

सं० अन्वयार्थः—( विप्राः ) हे मेधाविनो विद्वांसः—उपासका ( हिरण्यया राया ) हितरमणीयया-अमृतया, मुक्तिसम्बन्धया "अमृतं वै हिरण्यम्" [ श० २ । ४ । ४ । ५ ] अमृता सम्पत्ति स्वाद्धिसि हेतुना

( इयं मतिः ) एषा वाक् स्तुतिरूपा वाक् "वाग्वै मतिः" [ ता० ८।१।२।७ ] ( अवृकाय शवसे ) अच्छिन्नायामराय बलाय—बलप्रापणाय, तथा ( इयम् ) एषा हि मतिः—स्तुतिः ( मेधसातये ) अध्यात्मयज्ञस्य समापनाय कुरुतेति शेषः ॥ ८ ॥

भाषान्वयार्थः—( विप्राः ) हे उपासक विद्वानो ! तुम ( हिरण्यया-राया ) अमृतसम्पत्ति मुक्ति के हेतु तथा ( अवृकाय शवसे ) अच्छिन्न अमर बल के प्राप्त करने के लिये ( इयं मतिः ) यह स्तुति वाणी एवं, ( इयं मेधसातये ) यह स्तुति अध्यात्मयज्ञ पूर्ति के लिये करो ॥ ८ ॥

भावार्थः—अमृतसम्पत्ति मुक्ति के हेतु तथा अच्छिन्न बल के लिये अध्यात्मयज्ञ पूर्ण होने के लिये परमात्मा की स्तुति करनी चाहिए ॥ ८ ॥

ते स्याम देव वरुण ते मित्र सूरिभिः सह । इषं स्वश्च धीमहि ॥ ९ ॥

ते । स्याम । देव । वरुण । ते । मित्र । सूरिऽभिः । सह । इषम् । स्वरिति स्वः । च । धीमहि ॥ ९ ॥

सं० अन्वयार्थः—( वरुण देव ) हे स्वाश्रये वरयितः परमात्म-देव ! ( सूरिभिः सह ) स्तोतृभिः सह "सूरिः स्तोतृनाम" [ निघ० ३ । १६ ] ( ते स्याम ) तव वयं स्तोतारो भवेम ( तथा ) ( मित्र ) हे संसारे कर्मकरणाय प्रेरयितः परमात्मदेव ! ( ते ) तव स्तोतारो भवेम, इत्याकाङ्क्षा, यतः ( इषं स्वः—च धीमहि ) अन्नादिभोगमेवं मोक्षसुखं च धारयेम प्राप्नुयाम ॥ ९ ॥

भाषान्वयार्थः—( वरुणदेव ) हे स्वाश्रय में वरने वाले परमात्म-देव ! ( सूरिभिः सह ) स्तुतिकर्त्ता उपासकों के साथ ( ते स्याम ) तेरे स्तुतिकर्त्ता उपासक हम होवें ( मित्र ) हे संसार में कर्मकरणार्थ प्रेरित करने वाले परमात्मदेव ( ते ) तेरे हम स्तुतिकर्त्ता उपासक हों ( इषं च स्वः धीमहि ) अन्नादि भोग और मोक्ष, उसको धारण करें—प्राप्त होवें ॥ ९ ॥

भावार्थः—अन्य स्तुतिकर्त्ता उपासकों की भाँति स्तुति करने पर परमात्मा संसार में उत्तम भोग और मोक्षसुख स्वाश्रय में प्राप्त कराता है ॥ ९ ॥

बहवः सूरचक्षसोऽग्निजिह्वा ऋतावृधः ।
त्रीणि ये येमुर्विदथानि धीतिभिर्विश्वानि परिभूतिभिः ॥ १० ॥

बहवः । सूरऽचक्षसः । अग्निऽजिह्वाः । ऋतऽवृधः । त्रीणि । ये । येमुः । विदथानि । धीतिऽभिः । विश्वानि । परिभूतिभिः ॥ १० ॥

सं० अन्वयार्थः—( बहवः ) असंख्याताः ( सूरचक्षसः ) सूर्यसदृशाः—ज्ञानप्रकाशका विद्यासूर्याः ( अग्निजिह्वाः ) अग्निवाचस्तेजस्विनो वक्तारो सद्यो व्याख्यातारः "जिह्वा वाङ् नाम" [ निघ० १—११ ] ( ऋतावृधः ) सत्यस्य सदाचारस्य वर्धका, सदाचारप्रचारकाः ( ये त्रीणि विश्वानि विदथानि येमुः ) ये जनास्त्रीणि विषयप्रवेशयोग्यानि वेदनानि परमात्मप्राप्तिकराणि स्तुतिप्रार्थनोपासनानि स्वाधीनानि सम्पादितवन्तः ( धीतिभिः परिभूतिभिः ) प्रज्ञाभिः "ऋतस्य धीतिः प्रज्ञा" [ निरु० १० । ४० ] सर्वथा निरन्तराभ्यासगतिभिः-तीव्रसंवेगैः- आशत, 'अग्निम मन्त्रतः' प्राप्नुवन्ति परमात्मानमित्यर्थः ॥ १० ॥

भाषान्वयार्थः—( बहवः ) बहुतेरे ( सूरचक्षसः ) सूर्यसमान ज्ञान-प्रकाशकविद्यासूर्य विद्वान् ( अग्निजिह्वाः ) अग्निसमान वाणी वाले तेजस्वी त्वरित वक्ताजन ( ऋतावृधः ) सत्य सदाचारवर्धक स्वाचरण से सदाचार प्रचारक ( ये त्रीणि विश्वानि विदथानि येमुः ) जो तीनों प्रवेश योग्य स्तुति प्रार्थना उपासनाओं को स्वाधीन किए हुए या करते हैं ( धीतिभिः परिभूतिभिः ) प्रज्ञाओं द्वारा और निरन्तर अभ्यासगतियों-तीव्र संवेगों से परमात्मा को प्राप्त करते हैं ॥ १० ॥

भावार्थः—सूर्यसमान ज्ञानप्रकाशक अग्निसमान तुरन्त वक्ता स्वजीवन से सदाचारप्रचारक परमात्मा की स्तुति, प्रार्थना, उपासना को निरन्तर करने कराने वाले जन परमात्मा को प्राप्त करते हैं ॥ १० ॥

वि ये दधुः शरदं मासमादहर्यज्ञमक्तुं चादृचम् ।
अनाप्यं वरुणो मित्रो अर्यमा क्षत्रं राजान आशत ॥ ११ ॥

वि । ये । दधुः । शरदम् । मासम् । आत् । अहः । यज्ञम् । अक्तुम् । च । आत् । ऋचम् । अनाप्यम् । वरुणः । मित्रः । अर्यमा । क्षत्रम् । राजानः । आशत ॥ ११ ॥

सं० अन्वयार्थः—( वै ) यः ( वरुणः ) स्वाश्रये वरयिता ( मित्रः ) संसारे कर्मकरणीय प्रेरयिता ( अर्यमा ) भोगापवर्गफलस्य दाता परमात्मा ( शरदम् ) संवत्सरम् "जीवेम शरदः शतमिति यथा" ( मासम् ) चान्द्रमासादिकं मासम् ( अहः ) दिवसम् ( अक्तुम् ) रात्रिम् "अक्तुः—रात्रिनाम" [ निघ० १ । ७ ] ( आत् ) अथ च ( यज्ञम् ) सृष्टियज्ञम् "यज्ञो वै भुवनस्य ज्येष्ठम्" [ कौ० २५ । १ ] "मन्त्रः सङ्कृतः संलाप [ ऋ० १ । १८ । ७ दयानन्दः ] ( च-आत् ) अथ च ( ऋचम् ) मन्त्रमात्रं वेदम् ( अनाप्यम् ) सर्वप्राप्यं मोक्षधाम ( विदधुः ) विदधाति विशेषेण धारयति सः ( राजानः क्षत्रम्-आशत ) जङ्गमानां राजा खल्वोजः प्राप्नोति । सर्वत्र बहुवचनमादरार्थम् ॥ ११ ॥

भावान्वयार्थः—( वै ) जो ( वरुणः ) स्वाश्रये में वरने वाला ( मित्रः ) संसार में कर्म करने के लिये प्रेरितकर्त्ता ( अर्यमा ) भोग मोक्ष कर्मफल दाता परमात्मा ( शरदम् ) संवत्सर वर्ष को ( मासम् ) महीने को ( अहः ) दिन को ( अक्तुम् ) रात्रि को ( आत् ) पुनः ( यज्ञम् ) सृष्टि को ( च-आत् ) और फिर ( ऋचम् ) मन्त्र-वेद को ( अनाप्यम् ) दुर्लभ मोक्ष को ( विदधुः ) विशेष रूप से धारण करता है ( राजानः ) वह जङ्गम का राजा ( क्षत्रम् ) ओज को ( आशत ) प्राप्त है ॥ ११ ॥

भावार्थः—परमात्मा ने वर्ष मास दिन रात्रि कालप्रवाह को सृष्टि को और वेदज्ञान को मोक्ष को विशेष रूप से धारण किया हुआ है, वह इन पर स्वामित्व करता है ऐसा ओजस्वी है ॥ ११ ॥

तद्वो अद्य मनामहे सूक्तैः सूर उदिते ।
यदोहते वरुणो मित्रो अर्यमा यूयमृतस्य रथ्यः ॥ १२ ॥

तत् । वः । अद्य । मनामहे । सुऽउक्तैः । सूरे । उत्ऽइते । यत् । ओहते । वरुणः । मित्रः । अर्यमा । यूयम् । ऋतस्य । रथ्यः ॥ १२ ॥

सं० अन्वयार्थः—( वरुणः ) स्वाश्रये वरयिता ( मित्रः ) संसारे कर्मकरणाय प्रेरयिता ( अर्यमा ) भोगापवर्गरूपस्य कर्मफलस्य दाता परमात्मा ( यत् ) यत् ( ओहते ) संसारं वहति ( यूयम् ) स त्वम् ( ऋतस्य रथ्यः ) समग्रस्य संसारमोक्षात्मकस्य रथरूपस्य स्वामी

( तत् ) तस्मात् ( अद्य–उदिते सूरे ) अद्य–उदिते सूर्ये प्रातःकाले ( वः ) त्वाम् ( सूक्तैः—मनामहे ) सुवचनैः—स्तुतिवचनैः याचामहे ध्यायेम ॥ १२ ॥

भाषान्वयार्थः—( वरुणः ) स्वाश्रय में वरने वाला ( मित्रः ) संसार में कर्म करने के लिये प्रेरक ( अर्यमा ) भोग मोक्ष रूप कर्मफल दाता परमात्मा ( यत् ) जो कि ( ओहते ) संसार को वहन करता है ( यूयम् ) वह तू ( ऋतस्य रथ्यः ) संसार मोक्षरूप रथ का स्वामी ( तत् ) जिससे ( अद्य-उदिते सूरे ) आज इस जीवन में उदित सूर्य पर प्रातःकाल ( वः ) तुझको ( सूक्तैः—मनामहे ) स्तुति वचनों से अपनाते हैं ध्याते हैं ॥ १२ ॥

भावार्थः—संसार में कर्म करने के लिये प्रेरक अपने आश्रय में लेने वाले कर्मफल भोग मोक्ष देने वाले संसार के स्वामी परमात्मा को स्तुति वचनों द्वारा अपनाना चाहिए ॥ १२ ॥

**ऋतावान ऋतजाता ऋतावृधो घोरासो अनृतद्विषः ।**
**तेषां वः सुम्ने सुच्छर्दिष्टमे नरः स्याम ये च सूरयः ॥१३॥**

ऋतऽवानः । ऋतऽजाताः । ऋतऽवृधः । घोरासः । अनृतऽद्विषः । तेषाम् । वः । सुम्ने । सुच्छर्दिःऽतमे । नरः । स्याम । ये । च । सूरयः ॥ १३ ॥

**सं० अन्वयार्थः**—( ऋतावानः ) अमृतानन्दवान् "ऋतममृतमित्याह" [ जै० २ । १६० ] ( ऋतजाताः ) सत्येन स्वरूपेण प्रसिद्धः ( ऋतावृधः ) ज्ञानप्रकाशस्य वर्धयिता ( घोरासः ) प्रतापी ( अनृतद्विषः ) पापद्वेष्टा-इत्येवं विशेषणयुक्तो हे परमात्मन् ( तेषां वः ) तस्य तत् ( सुम्ने ) सुखे सुखकरे ( सुच्छर्दिष्टमे ) अत्यन्तशोभनगृहे मोक्षे "छर्दिः—गृहनाम" [ निघ० ३ । ४ ] ( ये च ) ये चन-येहि ( सूरयः-नरः स्याम ) वयं स्तोतारः—जीवनमुक्ताः "नरा ह ते देवविशाः" [ जै० १ । ८६ ] भवेम ॥ १३ ॥

भाषान्वयार्थः—( ऋतावानः ) अमृतानन्द वाला ( ऋताजाताः ) सत्यस्वरूप से प्रसिद्ध ( ऋतावृधः ) ज्ञानप्रकाश का वर्धक ( घोरासः ) प्रतापी ( अनृतद्विषः ) पाप पापी का द्वेष्टा इन विशेषणों से युक्त परमात्मन् ! ( तेषां वः ) उस तेरे ( सुम्ने ) सुखद ( सुच्छर्दिष्टमे ) अत्यन्त शोभन गृह

मोक्ष में ( ये च ) जो भी (सूरयः-नरः स्याम) हम स्तोता उपासक जीवनमुक्त होवें ॥ १३ ॥

भावार्थः—परमात्मा अमृतानन्दवाला सत्यस्वरूप ज्ञानप्रकाशक प्रतापी पाप पापी से द्वेष करने वाला है, उस परमात्मा के सुखद मोक्ष धाम में स्तोता उपासक जीवनमुक्त स्थिर होते हैं ॥ १३ ॥

उदु त्यद्दर्शतं वपुर्दिव एति प्रतिह्वरे ।
यदीमाशुर्वहति देव एतशो विश्वस्मै चक्षसे अरम् ॥ १४ ॥

उत् । ऊँ इति । त्यत् । दर्शतम् । वपुः । दिवः । एति । प्रतिऽह्वरे । यत् । ईम् । आशुः । वहति । देवः । एतशः । विश्वस्मै । चक्षसे । अरम् ॥ १४ ॥

सं० अन्वयार्थः—( दिवः-दर्शतं वपुः ) द्योतमानस्य सर्वप्रकाशकस्य परमात्मनो दर्शनीयं निरूपकं लक्ष्य "योऽसावादित्ये पुरुषः सोऽसावहम् । ओ३म् खं ब्रह्म" [ यजु० ४० । १७ ] "वपुः रूपनाम" [ निघ० ३ । ७ ] ( प्रतिह्वरे ) ह्वरं ह्वरं प्रति योऽपि गृहं पिण्डो वा कुटिलगामी न निजाधारगामी किन्तु सोऽन्यस्य परितोगामी तं तं प्रति "लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः" [ अष्टा० १ । ४ । ८६ ] इति वीप्सायामत्र प्रतिशब्दः "ह्वृ कौटिल्ये भ्वादि" ( त्यत्-उ-उदेति ) तत् खलु लक्ष्यं सूर्यरूपमुदेति ( यत्-ईम् ) यतो हि ( आशुः ) प्रकाशेन व्यापनशीलः (एतशः-देवः) शुभ्रः-प्रकाशरूपः ( विश्वस्मै चक्षसे-अरम् ) विश्वं प्रकाशयितुं समर्थोऽस्ति ॥ १४ ॥

भाषान्वयार्थः—( दिवः-दर्शतं वपुः ) द्योतमान सर्वप्रकाशक परमात्मा का निरूपक दर्शनीय चिह्न ( त्यत्-उ ) वह सूर्यरूप ( प्रतिह्वरे ) पिण्ड पिण्ड पर (उद्-एति ) उदय होता है ( यत्-ईम् ) जो कि ( आशुः ) प्रकाश द्वारा व्यापनशील ( एतशः-देवः ) शुभ्र प्रकाशरूप ( विश्वस्मै चक्षसे-अरम् ) विश्व को प्रकाशित करने-प्रकाश देने को समर्थ है ॥ १४ ॥

भावार्थः—नितान्त सर्वप्रकाशक परमात्मा का रचा सूर्य उसका निरूपक, प्रत्येक पिण्ड पर उदय होकर विश्व को प्रकाशित करने में समर्थ है, उस परमात्मा की स्तुति करनी चाहिए ॥ १४ ॥

**शीर्ष्णःशीर्ष्णो जगतस्तस्थुषस्पतिं समया विश्वमा रजः ।**
**सप्त स्वसारः सुविताय सूर्यं वहन्ति हरितो रथे ॥ १५ ॥**

शीर्ष्णः ऽशीर्ष्णः । जगतः । तस्थुषः । पतिम् । समया । विश्वम् । आ । रजः । सप्त । स्वसारः । सुविताय । सूर्यम् । वहन्ति । हरितः । रथे ॥ १५ ॥

**सं० अन्वयार्थः**—( जगतः-तस्थुषः ) जङ्गमस्य स्थावरस्य ( शीर्ष्णः शीर्ष्णः ) प्रत्येकस्याः शिरोभूतस्याः-लक्ष्म्याः "श्री वै शिरः" [ श० १ । ४ । ५ । ५ ] शोभायाः ( पतिम् ) स्वामिनम् ( विश्वं रजः समया ) विश्वस्य लोकस्य मध्ये "समया मध्येवर्तमानम् [ अव्ययार्थ निबन्धनम् ] ( सूर्यम् ) आदित्यम् (सप्तस्वसारः-हरितः) सप्त सम्यक् सृप्तस्वभावाः रसहरणशीलाः रश्मयः "हरितः-हरणा आदित्यरश्मयः" [ निरु० ४ । १० ] ( सुविताय ) प्रेरणकर्मणे ( रथे-आवहन्ति ) तस्य मण्डले समन्ताद् वहन्ति प्रापयन्ति संस्थापयन्ति ॥ १५ ॥

भाषान्वयार्थः—( जगतः-तस्थुषः ) जङ्गम स्थावर के तथा ( शीर्ष्णः शीर्ष्णः ) संसार की शिरोभूत लक्ष्मी-शोभा के ( पतिम् ) स्वामी ( विश्वं रजः समया ) समस्त लोक के मध्य वर्तमान ( सूर्यम् ) सूर्य को ( सप्त स्वसारः-हरितः ) भली भाँति बिखरती हुई किरणें ( सुविताय ) प्रेरणा देने रूप कर्म के लिये ( रथे ) उसके मण्डल में ( आवहन्ति ) भली भाँति वहन करती हैं ॥ १५ ॥

भावार्थः—जड़ जङ्गम तथा संसार की शोभा के स्वामी या रक्षक सूर्य को उसकी सम्यक् बिखरने वाली किरणें प्रेरणकर्मार्थ उसके मण्डल में वहन करती हैं ॥ १५ ॥

**तच्चक्षुर्देवहितं शुक्रमुच्चरत् ।**
**पश्येम शरदः शतं जीवेम शरदः शतम् ॥ १६ ॥**

तत् । चक्षुः । देवऽहितम् । शुक्रम् । उत्ऽचरत् । पश्येम । शरदः । शतम् । जीवेम । शरदः । शतम् ॥ १६ ॥

**सं० अन्वयार्थः**—( देवहितम् ) परमात्मदेवेन धृतम् ( तत् शुक्रं चक्षुः ) तद् विश्वस्य चक्षुर्भूतं प्रकाशकं शुभ्रं सूर्यम् ( उच्चरत् )

उदितं आतम् (शरदः शतं पश्येम) शतवर्षपर्यन्तं पश्येमहि, तथा (शरदः शतं जीवेम) तस्य सेवनेन शतवर्षपर्यन्तं जीवेम ॥ १६ ॥

भाषान्वयार्थः—(अभिहितम्) परमात्मदेव द्वारा धारित (उच्चरत्) उदित हुए (तत् चक्षुः) उस विश्व के चक्षुरूप प्रकाशक शुभ्रसूर्य को (शतं शरदः पश्येम) सौ वर्ष पर्यन्त देखते रहें (शतं शरदः जीवेम) उसके सेवन से सौ वर्ष तक जीवित रहें ॥ १६ ॥

भावार्थः—परमात्मा के रचे विश्व के प्रकाशक उदय हुए सूर्य को सौ वर्ष तक देखते रहें, उसके सेवन से सौ वर्ष जीवन धारण कर सकते हैं ॥ १६ ॥

**काव्येभिरदाभ्या यातं वरुण द्युमत् । मित्रश्च सोमपीतये ॥१७॥**

काव्येभिः । अदाभ्या । आ । यातम् । वरुण । द्युऽमत् । मित्रः । च । सोमऽपीतये ॥ १७ ॥

**सं० अन्वयार्थः**—(वरुण) हे उपदेशक (च) अन्यत्र (मित्रः) अध्यापकोऽपि द्वौ युवाम् (अदाभ्या) सौम्यस्वभावौ (काव्येभिः) विद्यात्रयछन्दोभिर्निमित्तैस्तदध्ययनोपदेशहेतुमभिलक्ष्य "त्रयी वै विद्या काव्यं छन्दः" [श० ८ । ५ । २ । ४] (द्युमत्-आयातम्) ज्ञानप्रकाशस्थानमागच्छतम् (सोमपीतये) सोमरसपानाय ॥ १७ ॥

भाषान्वयार्थः—(वरुण) हे उपदेशक (च) और (मित्रः) अध्यापक भी तुम दोनों (अदाभ्या) सरल स्वभाव (काव्येभिः) वेदवचनों के अध्यापन उपदेश के निमित्त (द्युमत्-आयातम्) ज्ञानप्रकाशनस्थान को प्राप्त होओ (सोमपीतये) सोमरस पान करने के लिये ॥ १७ ॥

भावार्थः—अध्यापक उपदेशकों को विद्यालयों में बुलाकर ज्ञान ग्रहण करना तथा सोमादि उत्तम खान पान से स्वागत करना चाहिए ॥ १७ ॥

**दिवो धामभिर्वरुण मित्रश्चा यातमद्रुहा ।
पिबतं सोममातुजी ॥ १८ ॥**

दिवः । धामऽभिः । वरुण । मित्रः । च । आ । यातम् । अद्रुहा । पिबतम् । सोमम् । आतुजी इत्याऽतुजी ॥ १८ ॥

**सं० अन्वयार्थः**—(वरुण) हे उपदेशक (मित्रः-च) अध्यापकोऽपि युवाम् (अद्रुहा) अद्रोग्धारौ सर्वस्नेहिनौ (दिवः-धामभिः)

ज्ञानप्रकाशस्य धामानि लक्ष्ययित्वा ( आयातम् ) प्राप्नुतम् ( आतुजी सोमं पिबतम् ) समन्ताज्ज्ञानबलवन्तौ सोमरसं पिबन्तम् ॥ १८ ॥

भाषान्वयार्थः—( वरुण ) हे उपदेशक ( मित्रश्च ) अध्यापक भी तुम दोनों ( अद्रुहा ) सर्वस्नेही ( दिवः-धामभिः ) ज्ञान प्रकाश के स्थानों को लक्ष्य कर ( आयातम् ) आओ ( आतुजी सोमं पिबतम् ) समस्त रूप से ज्ञान बल वाले सोमरस का पान करो ॥ १८ ॥

भावार्थः—अध्यापक उपदेशक मानवमात्र के स्नेही ज्ञानबल से पूर्ण ज्ञानप्रकाशक स्थानों पर आते हैं उनका सोम आदि से स्वागत करना चाहिए ॥ १८ ॥

आ यातं मित्रावरुणा जुषाणावाहुतिं नरा । पातं सोममृतावृधा ॥ १९ ॥

आ । यातम् । मित्रावरुणा । जुषाणौ । आऽहुतिम् । नरा । पातम् । सोमम् । ऋतऽवृधा ॥ १९ ॥

**सं० अन्वयार्थः**—( मित्रावरुणा नरा ) अध्यापकोपदेशकौ नेतारौ ( आहुतिं जुषाणौ ) अस्माभिर्दीयमानां समन्तादुपस्कृतिं सेवमानौ ( आयातम् ) प्राप्नुतम् ( ऋतावृधा ) ज्ञानस्य वर्धयितारौ (सोमं पातम्) सोमरसं पिबतम् । 'पातमिति छान्दसः प्रयोगः' पिबत्यर्थे ॥ १९ ॥

भाषान्वयार्थः—( मित्रावरुणा नरा ) अध्यापक उपदेशक नेता जन ( आहुतिं जुषाणा ) हमारे द्वारा दी भेंट को सेवन करते हुए ( आयातम् ) आवें ( ऋतावृधा ) ज्ञान के बढ़ाने वाले ( सोमं पातम् ) सोमरस पान करें ॥ १९ ॥

भावार्थः—अध्यापक उपदेशक हमारे जीवन के नेता हैं, ज्ञान बढ़ाने वाले हैं, उन्हें भेंट देनी चाहिए और सोमरस का पान कराना चाहिए ॥ १९ ॥

# सप्तषष्टितमं सूक्तम्

ऋषिः—वसिष्ठः ।

देवता—अश्विनौ ।

छन्दः—१, २, ६, ७, ८, १० निचृत् त्रिष्टुप् । ३, ५, ६ विराट त्रिष्टुप् । ४ आर्षी त्रिष्टुप् ।

**प्रति॑ वां॒ रथं॑ नृपती ज॒रध्यै॑ ह॒विष्म॑ता॒ मन॑सा य॒ज्ञिये॑न ।**
**यो वां॑ दू॒तो न धि॑ष्ण्या॒वजी॑ग॒रच्छा॑ सू॒नुर्न पि॒तरा॑ विवक्मि ॥ १ ॥**

प्रति॑ । वा॒म् । रथ॑म् । नृ॒प॒ती॒ इति॑ नृऽपती । ज॒रध्यै॑ । ह॒विष्म॑ता । मन॑सा । य॒ज्ञिये॑न । यः । वा॒म् । दू॒तः । न । धि॒ष्ण्यौ॒ । अजी॑गः । अच्छ॑ । सू॒नुः । न । पि॒तरा॑ । वि॒व॒क्मि॒ ॥ १ ॥

सं० अन्वयार्थः—( धिष्ण्यौ ) शत्रुदमनयोग्यौ प्रगल्भौ ( नृपती ) हे नराणां पालकौ सभासेनेशौ ( वां रथं प्रति ) युवयोः-रमण स्थानं रमणपदं प्रति ( हविष्मता यज्ञियेन मनसा ) उपहारवता हावभाववता पवित्रेण मनसा ( जरध्यै ) स्तुतये प्रशंसायै "जरति स्तुतिकर्मा" [ निघ० ३ । १४ ] ( वां यः-दूतः-न-अजीगः ) युवयोर्दूतः-इव सावधानीकृतवानिवाहं सावधानं करोमि ( अच्छ सूनुः-न पितरा विवक्मि ) योग्यः पुत्रो यथा मातापितरौ रक्षार्थं विशेषेण प्रार्थयते तद्वदहं पुरोहितो राष्ट्ररक्षार्थं प्रार्थये ॥ १ ॥

भाषान्वयार्थः—( धिष्ण्यौ नृपती ) शत्रुधर्षण स्वभाव वाले हे नरों प्रजाओं के पालक सभापति राजन् ! एवं सेनापति ! ( वां रथं प्रति ) तुम्हारे रमणीय पद के प्रति ( हविष्मता यज्ञियेन मनसा ) उपहार वाले पवित्र मन से ( जरध्यै ) प्रशंसा करने के लिए ( वां यः-दूतः-न-अजीगः ) तुम्हारे सावधान करने वाले दूत की भाँति मैं पुरोहित सावधान करता हूं ( अच्छ सूनुः-न पितरा विवक्मि ) योग्य पुत्र जैसे माता पिता से रक्षार्थं प्रार्थना करता है एवं राष्ट्ररक्षार्थं प्रार्थना करता हूँ ॥ १ ॥

भावार्थः—पुरोहित आदरभाव के साथ पवित्र मन से राजा और सेनानायक के पद की प्रशंसा करे और उन्हें सावधान करे जैसे योग्य पुत्र माता पिता को अपना अभिप्राय प्रकट करता है ॥ १ ॥

अशोच्यग्निः समिधानो अस्मे उपो अदृश्रन्तमसश्चिदन्ताः ।
अचेति केतुरुषसः पुरस्ताच्छ्रिये दिवो दुहितुर्जायमानः ॥ २ ॥

अशोचि । अग्निः । सम्ऽइधानः । अस्मे इति । उपो इति । अदृश्रन् । तमसः । चित् । अन्ताः । अचेति । केतुः । उषसः । पुरस्तात् । श्रिये । दिवः । दुहितुः । जायमानः ॥ २ ॥

सं० अन्वयार्थः—( अस्मे ) अस्माभिः पुरोहितैः "शे" [ अष्टा० १ । १ । १३ ] इति प्रगृह्यसंज्ञात्वात् प्रकृतिभावः ( अग्निः ) अग्रणीः सभापतीःराजा राजसूययज्ञेन ( समिधानः ) समिध्यमानः कर्मणि कर्तृप्रत्ययः ( अशोचि ) प्रकाशितो जातः ( उ ) अवश्यम् ( तमसः-चित्-अन्ताः ) अज्ञानान्धकारस्यापि प्रदेशाः ( उप-अदृश्रन् ) उपदृष्टा-अभवन् भवन्ति ( पुरस्तात् ) यथा पूर्वदिक्तः ( दिवः-दुहितुः-उषसः ) द्युलोकस्य दुहितुरुषसः सकाशात् ( केतुः ) प्रज्ञापकः प्रकाशकः सूर्यः ( जायमानः ) प्रसिद्धः ( अचेति ) तथाऽस्माभिश्चेतितः प्रसिद्धीकृतः ॥ २ ॥

भाषान्वयार्थः—( अस्मे ) हम पुरोहितों के द्वारा ( अग्निः ) अग्रणी सभापति राजा ( समिधानः ) सम्यक् तेजस्वी हुआ ( अशोचि ) प्रसिद्ध होता है ( उ ) अवश्य ( तमसः-चित्-अन्ताः ) अज्ञानान्धकार वाले प्रदेश वनवासी जन भी ( उप-अदृश्रन् ) देख सकें जान सकें ( पुरस्तात् ) जैसे पूर्व दिशा से ( दिवः-दुहितुः-उषसः ) द्युलोक की पुत्री उषा से उत्पन्न हुआ ( केतुः ) प्रज्ञापक प्रकाशक सूर्य ( जायमानः ) प्रसिद्ध हुआ ( अचेति ) वैसे हम पुरोहितों द्वारा प्रसिद्ध हुआ है ॥ २ ॥

भावार्थः—राजसूय यज्ञ में पुरोहित जन राजा को राजपद पर घोषित करें कि वनवासी तक भी जान जावें, और राजा अपनी राजसभा जो उसकी दुहिता के समान है उसके मध्य ऐसे प्रकाशित हो जैसे उषा होने पर सूर्य प्रकाशमान होता है ॥ २ ॥

अभि वां नूनमश्विना सुहोता स्तोमैः सिषक्ति नासत्या विवक्वान् । पूर्वीभिर्यातं पथ्याभिरर्वाक्स्वर्विदा वसुमता रथेन ॥ ३ ॥

अभि । वाम् । नूनम् । अश्विना । सुऽहोता । स्तोमैः । सिसक्ति । नासत्या । विवक्वान् । पूर्वीभिः । यातम् । पथ्याभिः । अर्वाक् । स्वःऽविदा । वसुऽमता । रथेन ॥ ३ ॥

सं० अन्वयार्थः—( अश्विना ) हे अश्ववन्तौ क्षत्रवन्तौ राष्ट्र-स्वामिनौ "क्षत्रं वा अश्वः" [ श० १३ । २ । २ । १५ ] "क्षत्रं हि राष्ट्रम्" [ श० २ । १ । ३ । ५ ] ( नासत्या ) सत्याचरणवन्तौ "नासत्या-असत्याचरणरहितौ" [ यजु० २० । ७४ दयानन्दः ] ( वाम् ) युवाम् ( नूनं सुहोता विवक्वान् ) राजसूयशोभनसंस्कारकर्ता सम्प्रतिविशेषेण राजधर्मोपदेष्टा पुरोहितः ( स्तोमैः ) मन्त्रैः ( अभिसिषक्ति ) अभिषेकं करोति यद्वा कर्तुमिच्छति "षच सेचने" [ भ्वादि० ] ( पूर्वीभिः पथ्याभिः ) युवां पूर्ववर्तिनीभी राजपरम्परागताभिः श्रेष्ठाभिर्वा न्यायपथानुकूलाभी रीतिभिर्नीतिभिः ( स्वर्विदा वसुमता रथेन ) सुखप्रापकेण धनवता धनप्रापकेण सुवर्णालङ्कृतेन वा रमणीयेन राज्येन ( अर्वाक् यातम् ) अस्मदभिमुखं प्रजाभिमुखं प्राप्नुतम् ॥ ३ ॥

भाषान्वयार्थः—( अश्विना ) हे राष्ट्रस्वामी राजा रानी ( नासत्या ) सत्याचरण वाले ( वाम् ) तुम दोनों को ( नूनं सुहोता विवक्वान् ) अब राजसूय यज्ञ शोभन संस्कारकर्त्ता विशेष राजधर्म-प्रवक्ता पुरोहित ( स्तोमैः ) वेदमन्त्रों द्वारा ( अभिसिषक्ति ) अभिषिक्त करता है ( पूर्वीभिः पथ्याभिः ) तुम दोनों पूर्व या श्रेष्ठ राजपरम्पराओं से या राजपथानुकूल रीतियों से ( स्वर्विदा वसुमता रथेन ) सुख प्राप्त कराने वाले धन वाले धन प्राप्त कराने वाले या स्वर्णालङ्कृत सुनहरे रमणीय राज्य से ( अर्वाक् यातम् ) इधर प्रजाओं को प्राप्त हुए हो ॥ ३ ॥

भावार्थः—राष्ट्रस्वामी राजा रानी का राजसूय यज्ञ में कुशल संस्कारकर्त्ता राजधर्म का पुरोहित राज्याभिषेक करे, राजा रानी भी श्रेष्ठ परम्पराओं के अनुसार प्रजाओं को सुखद धनप्रद राज्यपद से प्राप्त हों ॥ ३ ॥

अवो॑र्वां नू॒नम॑श्विना यु॒वाकु॑र्हु॒वे यद्वां॑ सु॒ते मा॑ध्वी वसू॒युः ।
आ वां॑ वहन्तु॒ स्थवि॑रासो॒ अश्वा॒ः पिबा॑थो अ॒स्मे सु॒षु॑ता॒ मधू॑नि
॥ ४ ॥

अ॒वोः । वा॒म् । नू॒नम् । अ॒श्वि॒ना॒ । यु॒वाकुः॑ । हु॒वे । यत् ।
वा॒म् । सु॒ते । मा॒ध्वी इति॑ । व॒सु॒ऽयुः । आ । वा॒म् । व॒ह॒न्तु॒ ।
स्थवि॑रासः । अश्वाः॑ । पिबा॑थः । अ॒स्मे इति॑ । सु॒ऽसु॑ता । मधू॑नि
॥ ४ ॥

सं॰ अन्वयार्थः—( अश्विना ) हे अश्ववन्तौ राष्ट्रस्वामिनौ राजराजपत्न्यौ ( वाम्-अवोः ) युवयोः-राष्ट्ररक्षकयोः ( युवाकुः-वसूयुः ) युवां कामयमानो धनं कामयमानश्चाहं पुरोहितः "युवाकवः ये युवां कामयन्ते ते" [ यजु॰ ३३ । ५८ दयानन्दः ] ( माध्वी ) हे मधुरादिगुणप्रापकौ प्रजासु स्नेहपालनप्रेरणसमर्थौ "मधुरादिगुणप्रापकौ" [ ऋ॰ ५ । ७५ । १ दयानन्दः ] ( वाम् ) युवाभ्यां युष्मदर्थे ( सुते ) राजसूयेन राष्ट्रे सुते सुनिष्पन्ने ( नूनं हुवे ) अहं प्रार्थये निश्चयेन-आशीर्ददामि वां यत् ( वाम् ) युवाम् ( स्थाविरासः-अश्वाः ) ज्येष्ठा महान्तः "ज्येष्ठा महान्तो" [ ऋ॰ ६ । २४ । ६ दयानन्दः ] ज्ञानेश्वरा विद्वांसः "ईश्वरो वा अश्वः" [ तै॰ ३ । ८ । ६ । ३१ ] ( आवहन्तु ) समन्ताद् धारयन्तु सम्पोषयन्तु ( अस्मे सुषुता मधूनि पिबाथः ) राजसूये-अस्माभिः सुष्ठु सुतानि मधुराणि पेयानि पिबथः ॥ ४ ॥

भाषान्वयार्थः— (अश्विना) हे राष्ट्रस्वामी राजा रानी (वाम्-अवोः) तुम राष्ट्ररक्षकों का ( युवाकुः - वसूयुः ) मैं पुरोहित तुम दोनों की मंगल-कामना करने वाला तथा धन का चाहने वाला ( माध्वी ) हे मधुरादि गुण प्राप्त हुए ( वाम् ) तुम दोनों के लिए ( सुते ) राजसूय से राष्ट्र निष्पन्न होने पर ( नूनं हुवे ) निश्चय से प्रार्थना करता हूँ या आशीर्वाद देता हूँ कि ( वाम् ) तुम दोनों को ( स्थविरासः - अश्वाः - आवहन्तु ) ज्येष्ठ महान् विद्वान् जन समन्तरूप से धारण करें सम्पोषण दें ( अस्मे सुषुता मधूनि पिबाथः ) हमारे द्वारा राजसूय यज्ञ में सुष्ठु निचोड़े मधुर पेय पीने योग्य रसों का पान करें ॥ ४ ॥

भावार्थः—राजसूय यज्ञ में प्रजाओं के प्रति मधुर व्यवहार वाले राजा रानी को आशीर्वाद दें तथा अन्य ज्येष्ठ महान् जन भी सम्पोषण दें एवं सबके समक्ष मधुर रस का पान कर हर्ष का अनुभव करें ॥ ४ ॥

**प्राचीमु देवाश्विना धियं मेऽमृध्रां सातये कृतं वसूयुम् ।**
**विश्वा अविष्टं वाज आ पुरन्धीस्ता नः शक्तं शचीपती शचीभिः ॥ ५ ॥**

प्राचीम् । ऊँ इति । देवा । अश्विना । धियम् । मे । अमृध्राम् । सातये । कृतम् । वसुऽयुम् । विश्वाः । अविष्टम् । वाजे । आ । पुरम्ऽधीः । ता । नः । शक्तम् । शचीपती इति शचीऽपती । शचीभिः ॥ ५ ॥

सं० अन्वयार्थः—( देवा-अश्विना ) हे विजयशीलौ राष्ट्रस्वामिनौ सभासेनेशौ "अश्विना सभासेनेशौ" [ ऋ० १ । ४ । ७ । ३ दयानन्दः ] ( मे ) मह्यं राज्ञे ( प्राचीम्-उ ) प्रवृद्धां खलु "प्राचीं प्रवृद्धाम्" [ निरु० ११ । ६ ] ( अमृध्रां धियम् ) अबाध्यां पराक्रमवृत्तिम् ( वसूयुम् ) धनैश्वर्यप्रापणीयम् ( सातये कृतम् ) राष्ट्रलाभाय कुरुतम् ( विश्वाः पुरन्धीः ) विश्वकार्यव्यापिन्यो बहुविधाः प्रज्ञाः ( ताः ) ताः ( वाजे-आ ) संग्रामे च ( अविष्टम् ) रक्षतम् ( शचीपती शचीभिः-नः शक्तम् ) हे प्रज्ञास्वामिनौ स्वकीयप्रज्ञाभिः कर्मप्रवृत्तिभिर्वा नः-अस्मान् शक्तान् कुरुतम् ॥ ५ ॥

भाषान्वयार्थः—( देवा अश्विना ) हे विजयशील सभा और सेना के स्वामी तुम दोनों ( मे ) मुझ राजा के लिए ( प्राचीम्-उ ) प्रवृद्ध बढी चढी ही ( अमृध्रां धियम् ) अबाध्य पराक्रमप्रवृत्ति को ( वसूयुम् ) धनैश्वर्य प्राप्त कराने वाली को ( सातये कृतम् ) राष्ट्रलाभ के लिये करो ( विश्वाः-पुरन्धीः ) सब कार्यव्यापी बहुत प्रकार की बुद्धियां ( ताः ) उन्हें ( वाजे-आ ) और संग्राम में ( अविष्टम् ) रक्षित करो ( शचीपती शचीभिः-नः शक्तम् ) प्रजा कर्मप्रवृत्ति के स्वामी तुम दोनों अपनी प्रज्ञाओं से एवं कर्मप्रवृत्तियों से हमें समर्थ बनाओ ॥ ५ ॥

भावार्थः—सभा और सेना के स्वामी राजा एवं राष्ट्र के लिए

धनैश्वर्य को प्राप्त कराने वाली अबाध्य पराक्रमप्रवृत्ति को सम्पादित कर संग्राम में नाना प्रकार की बुद्धियों से कार्य लें बुद्धियों से समर्थ बनावें ॥ ५ ॥

**अविष्टं धीष्वश्विना न आसु प्रजावद्रेतो अह्रयं नो अस्तु ।**

**आ वां तोके तनये तूतुजानाः सुरत्नासो देववीतिं गमेम ॥ ६ ॥**

अविष्टम् । धीषु । अश्विना । नः । आसु । प्रजाऽवत् । रेतः । अह्रयम् । नः । अस्तु । आ । वाम् । तोके । तनये । तूतुजानाः । सुऽरत्नासः । देवऽवीतिम् । गमेम ॥ ६ ॥

**सं० अन्वयार्थः**—( अश्विना ) हे सभासेनेशौ ( नः ) अस्मान् एवम् ( अविष्टम् ) राष्ट्रे रक्षतम्, यत् ( आसु धीषु ) एतासु राष्ट्रिय-कर्मप्रवृत्तिषु—सदाचरणक्रियासु ( नः-रेतः प्रजावत्-अह्रयम्-अस्तु ) अस्माकं रेतः प्रजननबलं वीर्यं प्रजावत् सन्ततिवत्-सन्तानार्थमव्यर्थं संयतं तथा चाक्षीणं सबलमनपुंसकं भवतु ( वाम् ) युवयोः-रक्षणे ( तोके तनये ) पुत्रे पौत्रे च जाते सति ( तूतुजानाः-सुरत्नासः ) बलवन्तः शोभनरत्नवन्तश्च सन्तः "तुज हिंसाबलादाननिकेतनेषु" [ चुरादि० ] ( देववीतिं गमेम ) दिव्यगुणानां सुखानां वीतिं व्याप्तिं गच्छेम "देववीतये दिव्यानां गुणानां व्याप्तये" [यजु० ३७ । १८ दयानन्दः] ॥ ६ ॥

**भाषान्वयार्थः**—( अश्विना ) हे सभा सेना के स्वामियो ! ( नः ) हमारी ऐसे ( अविष्टम् ) रक्षा करो कि ( आसु धीषु ) इन राष्ट्रीय कर्म-प्रवृत्तियों में सदाचरण क्रियाओं में ( नः-रेतः प्रजावत्-अह्रयम्-अस्तु ) हमारा प्रजननबल वीर्य प्रजावाला - सन्तानवाला सन्तानार्थ अव्यर्थ व्यभिचाररहित एवं नपुंसकतारहित सबल हो ( वाम् ) तुम्हारे रक्षण में ( तोके तनये ) पुत्र पौत्र हो जाने पर ( तूतुजानाः सुरत्नासः ) बलवान् शोभन रत्न वाले होते हुए ( देववीतिं गमेम ) दिव्य गुणों सुखों की व्याप्ति को प्राप्त हों ॥ ६ ॥

**भावार्थः**—सभा सेना के स्वामी के रक्षण में रहते हुए ऐसे राष्ट्रीय सदाचरण प्रवृत्तियों में रहें जिस से जन सन्तान वाले संयमी बलवान् शोभन धनैश्वर्य को प्राप्त हुए दिव्य गुण सुखों को प्राप्त कर सकें ॥ ६ ॥

**एष स्य वां पूर्वगत्वेव सख्ये निधिर्हितो माध्वी रातो अस्मे ।**

**अहेळता मनसा यातमर्वागश्नन्ता हव्यं मानुषीषु विक्षु ॥ ७ ॥**

एषः । स्यः । वाम् । पूर्वगत्वाऽइव । सख्ये । निऽधिः । हितः । माध्वी इति । रातः । अस्मे इति । अहेळता । मनसा । आ । यातम् । अर्वाक् । अश्नन्ता । हव्यम् । मानुषीषु । विक्षु ॥ ७ ॥

सं० अन्वयार्थः—( माध्वी ) हे सोमरससेविनौ राजदम्पती ! "सोम्यं वै मधु" [ काठ. ११ । २ ] ( वाम् ) युवाभ्यां युष्मदर्थम् ( एषः-स्यः ) अयं स सोमरसः ( पूर्वगत्वा-इव ) पूर्वप्राप्तः-पूर्वः प्राप्तो हि "इवोऽपि दृश्यते पदपूरणः" [ निरु० १ । ११ ] ( अस्मे रातः ) मया पुरोहितेन दातव्यः ( सख्ये निधिः-हितः ) स्ववंशस्य समानख्याने राजपदत्वे निधानभूतः-अन्तर्धारणीयः समर्पितः ( अहेळता मनसा हव्यम्-अश्नन्ता ) क्रोधरहितेन शान्तमनसा तं ग्राह्यं सोमरसं भुञ्जानौ ( मानुषीषु विक्षु ) स्वकीयासु मनुष्यरूपासु प्रजासु शासनं कुरुतम् ॥७॥

भाषान्वयार्थः—( माध्वी ) हे सोमरस सेवन करने वाले राजा रानी ( वाम् ) तुम्हारे लिए ( एषः-स्यः ) यह वह सोमरस ( पूर्वगत्वा-इव ) पूर्व राजाओं या पूर्ववंशीय राजाओं से प्राप्त ( अस्मे रातः ) मुझ पुरोहित के द्वारा देने योग्य ( सख्ये निधिः - हितः ) स्ववंशीय समान राजपद होने के निमित्त ( अहेळता मनसा हव्यम्-अश्नन्ता ) शान्त मन से उस ग्रहण करने योग्य सोमरस को भोगते हुए ( मानुषीषु विक्षु ) अपनी मनुष्यरूप प्रजाओं में शासन करो ॥ ७ ॥

भावार्थः—राजसूय यज्ञ में अभिषिक्त राजा रानी को पुरोहित सोम रस प्रदान करे, जो पूर्ववंशीय राजाओं से भी प्राप्त करने योग्य होता रहा, उसे शान्त मन से सेवन करे और अपनी मानव प्रजाओं पर यथावत् शासन करे । राजाओं का पेय पदार्थ हर्षकर सोमरस है न कि सुरा ( शराब ) ग्लानिकर ( नशा करने वाला ) ॥ ७ ॥

**एकस्मिन् योगे भुरणा समाने परि वां सप्त स्रवतो रथो गात् ।**
**न वायन्ति सुभ्वो देवयुक्ता ये वां धूर्षु तरणयो वहन्ति ॥ ८ ॥**

एकस्मिन् । योगे । भुरणा । समाने । परि । वाम् । सप्त । स्रवतः । रथः । गात् । न वायन्ति । सुऽभ्वः । देवऽयुक्ताः । ये । वाम् । धूःसु । तरणयः । वहन्ति ॥ ८ ॥

**सं० अन्वयार्थः**—( भुरणा ) हे प्रजाभरणसमर्थौ सभासेनेशौ ( एकस्मिन् समाने योगे ) एकस्मिन्नेव समानधर्मे राजधर्मे योजनीयपदे राष्ट्रसंचालने ( वाम् ) युवयोः ( रथः ) रमणीयो देशः ( सप्त स्रवतः परि-अगात् ) सृप्ताः प्रवहन्तीर्नदीः परिप्राप्तोऽसि ( सुभ्वः-देवयुक्ताः-न वायन्ति ) तत्र देशे च विद्वत्संयुक्ताः प्रजाजनाः स्वदेशं शोभनं भावयितारो न शोषमायन्ति न श्राम्यन्ति "वै शोषणे" [ भ्वादि० ] ( ये ) ये खलु ( तरणयः ) देशोद्धारकाः ( वाम् ) युवाम् ( धूर्षु वहन्ति ) राष्ट्रधारकासु नीतिषु "धुरि या धारयति तस्याम्" [ ऋ० १ । १६४ । ६ दयानन्दः ] प्रापयन्ति चालयन्ति ॥ ८ ॥

भाषान्वयार्थः—( एकस्मिन् सामने योगे ) एक ही समान राजधर्म में तथा योजनीय राज्यपद में राष्ट्रसञ्चालन में ( वां रथः ) तुम्हारा रमणीय देश ( सप्त स्रवतः परि-अगात् ) बहती हुई नदी नहरों को परिप्राप्त है ( सुभ्वः - देवयुक्ताः-न वायन्ति ) और उस देश में विद्वानों से संयुक्त प्रजाजन स्वदेश को अच्छा बनाने वाले थकते नहीं हैं ( ये ) जो ( तरणयः ) देशोद्धारक ( वाम् ) तुम्हें ( धूर्षु वहन्ति ) राष्ट्रधारक नीतियों में ले जाते हैं चलाते हैं ॥ ८ ॥

भावार्थः—जिस देश में राजसभा सेना के अध्यक्ष एकभाव से प्रजा का पालन करने वाले समान राजधर्म में वर्तमान हों, जहां बहती हुई नदियां नहरें हों, विद्वानों के सहयोगी देशोद्धारक जन श्रम कार्य में अथक परिश्रमशील हों, राजनीतियों में उन्हें चलाने वाले हों वह देश या राष्ट्र धन्य है ॥ ८ ॥

**असश्चता मघवद्भ्यो हि भूतं ये राया मघदेयं जुनन्ति ।**
**प्र ये बन्धुं सूनृताभिस्तिरन्ते गव्या पृञ्चन्तो अश्व्या मघानि**
**॥ ९ ॥**

असश्चता । मघवत्ऽभ्यः । हि । भूतम् । ये । राया । मघऽदेयम् । जुनन्ति । प्र । ये । बन्धुम् । सूनृताभिः । तिरन्ते । गव्या । पृञ्चन्तः । अश्व्या । मघानि ॥ ९ ॥

**सं० अन्वयार्थः**—( मघवद्भ्यः ) यज्ञवद्भ्यः-यज्ञकर्तृभ्यः "यज्ञेन मघवान्" [ तै० सं० ४ । ४ । ८ । १ ] ( हि ) अवश्यम् ( असश्चता ) अव्युदस्यन्तौ शान्तगतिकौ कल्याणकारिणौ "असश्चन्ती

अभ्युदयस्यन्त्यौ" [ निरु० ५ । २ ] ( भूतम् ) युवां भवतम् ( ये राया मघदेयं जुनन्ति ) ये च स्वकीयेनायधनेन-उपहाररूपं दातव्यं प्रेरयन्ति प्रयच्छन्ति, अथ च ( ये ) ये खलु ( सूनृताभिः ) शोभनवाग्भिः सत्योपदेशैः ( बन्धुम् ) पुत्रशिष्यादिजनम् ( प्र तिरन्ते ) प्रवर्धयन्ति योग्यं गुणवन्तं कुर्वन्ति, अपि च ( गव्या-अश्व्या मघानि पृञ्चन्तः ) गोविषयाणि-अश्वविषयाणि धनानि पात्रेभ्यः प्रयच्छन्तः प्रतिरन्ते प्रवर्धयन्ति ॥ ६ ॥

भाषान्वयार्थः—( मघवद्भ्यः ) यज्ञ करने वालों के लिए ( हि ) अवश्य ( प्रसश्चता ) तुम राजा रानी शान्तगतिवाले कल्याणकारी ( भूतम् ) होओ, तथा ( ये ) जो ( राया ) अपने आय-प्राप्त धन से ( मघदेयम् ) उपहार-भेंट दातव्य को ( जुनन्ति ) समर्पित करते हैं—देते हैं, अपि च ( ये ) जो ( सूनृताभिः ) शोभन वाणियों उपदेशों द्वारा ( बन्धुम् ) पुत्र शिष्य आदियों को ( प्र तिरन्ते ) प्रवृद्ध करते हैं विद्वान् गुणवान् बनाते हैं, तथा ( गव्या अश्व्या मघानि पृञ्चन्तः ) गौओंसम्बन्धी घोड़ों सम्बन्धी धनों को पात्र के लिये प्रदान करते हुए जन हैं उनके प्रति भी कल्याणकारी होओ ॥ ६ ॥

भावार्थः—राजा रानी को चाहिये जो राष्ट्र में यज्ञ करने वालों निज धन में राजोपहार करने वाले पुत्र शिष्यादि को उपदेश देकर गुणवान् बनाने वालों तथा गौ घोड़ों आदि धनों को दान देने वालों के प्रति कल्याणकारी हों ॥ ६ ॥

नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत् ।
धत्तं रत्नानि जरतं च सूरीन् यूयं पात स्वस्तिभिः सदा नः
॥ १० ॥

नु । मे । हवम् । आ । शृणुतम् । युवाना । यासिष्टम् । वर्तिः । अश्विनौ । इराऽवत् । धत्तम् । रत्नानि । जरतम् । च । सूरीन् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ १० ॥

सं० अन्वयार्थः—( युवाना-अश्विना ) हे यौवनसम्पन्नौ राजराज्ञ्यौ ( नु ) अवश्यम् ( मे ) मम ( हवम्-आ शृणुतम् ) निवेदनं स्वीकुरुतम् ( इरावत्-वर्तिः-यासिष्टम् ) अन्नादियुक्तं वर्तनीयं राष्ट्रं

प्राप्नुतम् ( रत्नानि धत्तम् ) रमणीयानि भोगवस्तूनि धारयतम् ( च ) तथा ( सूरीन् जरतम् ) प्रज्ञातॄन् विदुषो ब्राह्मणान् ऋषीन् "सूरिः प्रज्ञाता" [ निरु० १० । २६ ] अर्चतं सत्कुरुतम् "जरति-अर्चतिकर्मा" [ निघ० ३ । १४ ] ( यूयं स्वस्तिभिः-नः सदा पात ) यूयम्-युवाम् 'आदरार्थे बहुवचनम्' ;अस्मान् कल्याणकरैः साधनैः सदा रक्षतम् ॥ १० ॥

भाषान्वयार्थः—( युवाना-अश्विना ) हे यौवनसम्पन्न या राज्यश्रीयुक्त राजा रानी ( नु ) अवश्य ( मे ) मुझ पुरोहित के ( हवम् ) निवेदन कथन को ( आ शृणुतम् ) स्वीकार करो ( इरावत्-वर्तिः-यासिष्टम् ) इस अन्नादि भोग वाले राष्ट्र को प्राप्त होओ ( रत्नानि धत्तम् ) रमणीय वस्तुओं को पहनो काम में लाओ ( च ) और ( सूरीन् जरतम् ) प्रकृष्ट विद्वानों ऋषियों को अर्चित करो—सत्कृत करो ( यूयम् ) तुम ( स्वस्तिभिः ) कल्याणसाधनों से ( नः ) हमारी ( सदा पात ) रक्षा करो ॥ १० ॥

भावार्थः—राष्ट्रश्री से युक्त हुए राजा रानी को चाहिये पुरोहित के आदेश पर चलें, अन्नादि से पूर्ण राष्ट्र को प्राप्त कर अनेक रत्नों से सुभूषित हों, विद्वानों ऋषियों का सत्कार और प्रजा की रक्षा में सदा तत्पर रहें ॥ १० ॥

---

# अष्टषष्टितमं सूक्तम्

ऋषिः—वसिष्ठः।

देवता—अश्विनौ।

छन्दः—१, ६, ८ साम्नी त्रिष्टुप्। २, ३, ५, साम्नी निचृत् त्रिष्टुप्। ४, ७ साम्नी भुरिगासुरी विराट् त्रिष्टुप्। ६ निचृत् त्रिष्टुप्।

**आ शुभ्रा यातमश्विना स्वश्वा गिरो दस्रा जुजुषाणा युवाकोः।**
**हव्यानि च प्रतिभृता वीतं नः॥ १॥**

आ। शुभ्रा। यातम्। अश्विना। सुऽअश्वा। गिरः। दस्रा। जुजुषाणा। युवाकोः। हव्यानि।। च। प्रतिऽभृता। वीतम्। नः ॥ १॥

**सं० अन्वयार्थः**—(शुभ्रा दस्रा-अश्विना) तेजस्विनौ "शुभ दीप्तौ" [भ्वादि०] ततो रक् प्रत्यय औणादिकः, शत्रूणां क्षेतारौ वज्रवन्तौ सभासेनेशौ "वज्रो वा अश्वः" [श० ४। ३। ४। २७] (स्वश्वा) कुशलवज्रन्तौ (आ यातम्) राज्यपदे समन्तात् प्राप्नुतम् (युवाकोः) युवां कामयमानस्य पुरोहितस्य (च) तथा (नः) अस्माकम्—अस्माभिः-युवाभ्यां (प्रतिभृता हव्यानि) समर्पितानि राज्याभिषेके विविधभोग्यानि (जुजुषाणा) प्रीयमाणौ (वीतम्) भुङ्क्थाम्॥ १॥

भाषान्वयार्थः—(शुभ्रा) तेजस्वी (दस्रा) शत्रुओं का क्षय करने वाले (अश्विना) वज्र वाले (स्वश्वा) कुशल वज्र वाले सभा स्वामी और सेनानी (आ यातम्) समन्त रूप से अधिकार पद को प्राप्त हों (च) और (युवाकोः) तुम दोनों की मंगलकामना करने वाले पुरोहित के (नः) हमारे द्वारा (प्रतिभृता) राज्याभिषेक पर समर्पित किए (हव्यानि) विविध भोगने योग्य वस्तुओं को (जुजुषाणा) पसन्द करते हुए (वीतम्) भोगो॥ १॥

भावार्थः—राष्ट्र के सभापति और सेनापति तेजस्वी शस्त्रास्त्रसम्पन्न शत्रुनाशक हों राज्याभिषेक अवसर पर पुरोहित द्वारा वेशभूषारूप शासन उपहार को सेवन करें ॥ १ ॥

**प्र वामन्धांसि मद्यान्यस्थुररं गन्तं हविषो वीतये मे ।**

**तिरो अर्यो हवनानि श्रुतं नः ॥ २ ॥**

प्र । वाम् । अन्धांसि । मद्यानि । अस्थुः । अरम् । गन्तम् । हविषः । वीतये । मे । तिरः । अर्यः । हवनानि । श्रुतम् । नः ॥ २ ॥

**सं० अन्वयार्थः**—( वाम् ) युवाभ्याम् ( मद्यानि-अन्धांसि ) हर्षकराणि "मदी हर्षे" [ दिवादि० ] सोमपेयानि ( प्र-अस्थुः ) प्रस्तुतानि सन्ति ( मे हविषः-वीतये-अरं गन्तम् ) मम-उपहारस्य प्राप्तये युवामलं गच्छतम् ( अर्यः-तिरः ) शत्रोः-तिरः शत्रुं तिरस्कुरुतम् ( नः-हवनानि श्रुतम् ) अस्माकं प्रजाजनानामाह्वानानि श्रुतम्-स्वीकुरुतम् ॥ २ ॥

भाषान्वयार्थः—( वाम् ) तुम सभापति और सेनापति के लिए ( मद्यानि-अन्धांसि प्र-अस्थुः ) हर्ष कराने वाले सोमपेय—सोमरस प्रस्तुत है ( मे हविषः-वीतये-अरं गन्तम् ) इस मेरे उपहार को सेवन करने के लिए पर्याप्त—योग्य हुए हो ( अर्यः-तिरः ) शत्रु को तिरस्कृत करो फटकारो दबाओ ( नः-हवनानि श्रुतम् ) हम प्रजाजनों के आह्वान स्वीकार करो ॥ २ ॥

भावार्थः—सभापति और सेनापति हर्षकर सोमरस का पान करें, सुरा का नहीं; पुरोहित की इस भेंट को स्वीकार करना चाहिये, शत्रु को तिरस्कृत करें प्रजा की बात सुनें ॥ २ ॥

**प्र वां रथो मनोजवा इयर्ति तिरो रजांस्यश्विना शतोतिः ।**

**अस्मभ्यं सूर्यावसू इयानः ॥ ३ ॥**

प्र । वाम् । रथः । मनःऽजवाः । इयर्ति । तिरः । रजांसि । अश्विना । शतऽऊतिः । अस्मभ्यम् । सूर्यावसू इति । इयानः ॥ ३ ॥

**सं० अन्वयार्थः**—( अश्विना ) वज्रवन्तौ सभासेनास्वामिनौ ( सूर्यावसू ) सूर्यदीप्त्यां वसन्ताविव तेजस्विनौ ( वां मनोजवाः रथः )

सुवयोः-मन इव वेगवान् यत्रथः सांग्रामिकरथः ( अस्मभ्यम्-इयानः ) अस्मानागच्छन् ( शतोतिः ) बहुरक्षणकलायुक्तः ( रजांसि तिरः ) अन्तरिक्षस्थानानि भूस्थलानि तीर्त्वा ( प्र-इयर्ति ) प्रगच्छति ॥ ३ ॥

भाषान्वयार्थः—( अश्विना सूर्यावसू ) हे सभापति और सेनानायक सूर्यकान्ति में बसे हुए तैजस्वी ( वां मनोजवाः-रथः ) तुम्हारा मन के समान वेग वाला सांग्रामिक रथ ( शतोतिः ) बहुत रक्षणकलायें जिसमें हैं ऐसा ( अस्मभ्यम्-इयानः ) हमारी ओर गति करता हुआ ( रजांसि तिरः ) अन्तरिक्ष स्थानों लोकों भूस्थलों को लांघता हुआ ( प्र-इयर्ति ) प्रगति करता है ॥ ३ ॥

भावार्थः—राष्ट्र में मनोवेग के समान अन्तरिक्ष लोको भूप्रदेश को शीघ्र लांघता हुआ सांग्रामिक यान भूयान वायुयान होने चाहियें ॥ ३ ॥

**अयं ह यद्वां देवया उ अद्रिरूर्ध्वो विवक्ति सोमसुद्युवभ्याम् ।**
**आ वल्गू विप्रो ववृतीत हव्यैः ॥ ४ ॥**

अयम् । ह । यत् । वाम् । देवऽयाः । ऊँ इति । अद्रिः । ऊर्ध्वः । विवक्ति । सोमऽसुत् । युवऽभ्याम् । आ । वल्गू इति । विप्रः । ववृतीत । हव्यैः ॥ ४ ॥

सं० अन्वयार्थः—( वां यत्-उ-अयम् ) हे सभासेनेशौ सुवयोः-यः-एषः ( देवयाः-ह ) देवयज्ञस्य राजसूयस्य कारयिता निश्चयेन य ऋत्विक् "देवायाः-देवेज्या" [ निरु० १२ । ६ ] यद्वा राजसूये देवानां यष्टा "देवयाः-देवान् यजमानः पूजयन्" [ ऋ० ३ । ८ । ५ दयानन्दः ] ( सोमसुत् ) तत्र राजसूये सोमं राज्यैश्वर्यं सोमरसं वा सुनोत्युत्पादयति सः "सोमसुद्भिः-ये सोममैश्वर्यमोषधिगणं वा सुन्वन्ति तैः" [ ऋ० ४ । २४ । ८ दयानन्द ] ( अद्रिः ) श्लोकान् मन्त्रान् करोति-उच्चारयति "अद्रिरसि श्लोककृत्" [ काठ० १ । ५ ] ( ऊर्ध्वः-विवक्ति ) उपरि स्थितः सन् राजधर्मान् विशेषेणोपदिशति ( विप्रः ) मेधावी ( वल्गू ) हे राज्यपदे संवरणीयौ ! "वल संवरणे" [ भ्वादि० ] ततः "वलेगुक् च" [ उणादि० १ । १६ ] ( हव्यैः-ववृतीत ) उपहारैः-वर्तते सत्करोति ॥ ४ ॥

भाषान्वयार्थः—( वां यत्-उ ) हे सभाध्यक्ष तथा सेनानायक तुम दोनों का जिससे निश्चय ( अयं देवयाः ) यह देवयज्ञ राजसूययत्र कराने वाला

( सोमसुत् ) राजसूय यज्ञ में राज्यैश्वर्य या सोमरस को उत्पन्न निष्पादन करने वाला ( ऋद्रिः ) श्लोकों-मन्त्रों का उच्चारणकर्ता ऋत्विक् पुरोहित ( ऊर्ध्वः-विवक्ति ) ऊपर बैठ कर राजधर्मों का विशेष प्रवचन करता है ( विप्रः ) वह मेधावी विद्वान् ( वल्गू ) हे राजसूय यज्ञ में संवरण करने योग्य दोनो राज्याधिकारियो ! ( हव्यैः-ववृतीत ) उपहारों द्वारा तुम्हारे प्रति वर्तता है—सत्कार करता है ॥ ४ ॥

भावार्थः—राजसूय यज्ञ में राज्यैश्वर्य एवं सोमरस को निष्पादन करने वाला पुरोहित मेधावी विद्वान् मन्त्रों द्वारा राजसूय यज्ञ के अवसर पर राजधर्मों का विशेष प्रवचन करे और उनका उपहारों से सत्कार करे ॥ ४ ॥

**चित्रं ह यद्वां भोजनं न्वस्ति न्यत्रये महिष्वन्तं युयोतम् ।**
**यो वामोमानं दधते प्रियः सन् ॥ ५ ॥**

चित्रम् । ह । यत् । वाम् । भोजनम् । नु । अस्ति । नि । अत्रये । माहिष्वन्तम् । युयोतम् । यः । वाम् । ओमानम् । दधते । प्रियः । । सन् ॥ ५ ॥

**सं० अन्वयार्थः**—( वाम् ) हे सभासेनेशौ युवयोः ( यत्- चित्रं भोजनं ह नु महिष्वन्तम्-अस्ति ) यत्-चायनीयं शोभनं भोग्यं महत्त्ववन्तं खलु हि वर्तते ( अत्रये ) त्रिविधदोषरहिताय कामक्रोधलोभरहिताय आप्तविदुषे पुरोहिताय "अत्रयः-त्रिभिः कामक्रोधलोभ दोषैः-रहिताः" [ यजु० ५ । २२ दयानन्दः ] ( नियुयोतम् ) नियोजयतं यद्वा निष्कृष्य दत्तम् ( यः प्रियः सन् ) यः खलु हितैषी प्रियकारी सन् ( वाम्-ओमानं दधते ) युवाभ्यां रक्षणहेतुं रक्षाकरमाशीर्वादं धारयति-अर्पयति ॥ ५ ॥

भाषान्वयार्थः—( वाम् ) हे सभाधीश सेनानायक तुम दोनों का ( यत्-चित्रं भोजनं ह नु महिष्वन्तम्-अस्ति ) जो शोभन महत्त्व वाला भोग है ( अत्रये ) काम क्रोध लोभ रहित आप्त विद्वान् पुरोहित के लिए ( नि युयोतम् ) नियत करो निकाल कर दो ( यः प्रियः सन् ) जो हितैषी प्रियकारी होता हुआ ( वाम्-ओमान दधते ) तुम्हारे लिए रक्षण आशीर्वाद धारण करता है-अर्पित करता है ॥ ५ ॥

भावार्थः—काम क्रोध लोभ से रहित आप्त विद्वान् हितचिन्तक आशीर्वाद देने वाले पुरोहित को राज्याधिकारी अपने बहुमूल्य महत्त्वपूर्ण भोग को केवल स्वयं अपने आप न भोग कर उसे भी दें ॥ ५ ॥

उत त्यद्वां जुरते अश्विना भूच्च्यवानाय प्रतीत्यं हविर्दे ।
अधि यद्वर्प इत ऊति धत्थः ॥ ६ ॥

उत । त्यत् । वाम् । जुरते । अश्विना । भूत् । च्यवानाय ।
प्रतीत्यम् । हविःऽदे । अधि । यत् । वर्पः । इतःऽऊति । धत्थः ॥६॥

**सं० अन्वयार्थः**—( अश्विना ) हे संभासेनेशौ ( उत ) अपि च ( वाम् ) युवाम् ( जुरते हविर्दे च्यवानाय ) स्तुवते-उपहारदात्रे आशीर्वाददात्रे स्तोमानां च्यावयित्रे-उच्चारयित्रे ऋषये पुरोहिताय "च्यवन ऋषि भवति च्यावयिता स्तोमानाम्" [ निरु० ४ । १९ ] ( प्रतीत्यम् ) प्रतिफलम् ( इतः-अति ) इतोऽग्रे दीर्घकालपर्यन्तं रक्षणम् ( यत्-वर्पः ) यत् खलु वरणीयं मान्यपदम् ( अधि धत्थः ) युवां समर्पयथः-इति शोभनकार्यम् ॥ ६ ॥

**भाषान्वयार्थः**—( अश्विना ) हे सभाध्यक्ष और सेनापति ( वाम् ) तुम्हारी ( जुरते ) स्तुति करते हुए ( हविर्दे ) उपहार आशीर्वाद देने वाले ( च्यवानाय ) स्तोम मन्त्रोच्चारण करने वाले के लिए ( प्रतीत्यम् ) प्रतिफल ( इतः-अति ) यहां से आगे बहुत काल तक रक्षण ( यत्-वर्पः ) जो कि वरणीय मान्यपद अधिकार जागीर ( अधि धत्थः ) समर्पित करते हो यह कार्य प्रशंसनीय कर्तव्य है ॥ ६ ॥

**भावार्थः**—राज्याभिषेक करने वाले मन्त्रपाठी पुरोहित सत्योपदेशक को राज्य में स्थायी पद प्रतीकार या प्रतिफल देना चाहिये ॥ ६ ॥

उत त्यं भुज्युमश्विना सखायो मध्ये जहुर्दुरेवासः समुद्रे ।
निरीं पर्षदरावा यो युवाकुः ॥ ७ ॥

उत । त्यम् । भुज्युम् । अश्विना । सखायः । मध्ये । जहुः ।
दुःऽएवासः । समुद्रे । निः । ईम् । पर्षत् । अरावा । यः । युवाकुः
॥ ७ ॥

**सं० अन्वयार्थः**—( अश्विना ) हे सभासेनाधीशौ ! ( उत ) अपि च ( त्यं भुज्युम् ) तं भोक्तुं योग्यं राज्याभिषेकयज्ञं राष्ट्रम् "यज्ञो व भुज्युः" [ श० ६ । ४ । १ । ११ ] दुर्-एवासः ) दुष्कामवन्तो

व्यसनिनः "एवैः कामैः" [ निरु० १२ । २२ ] ( सखायः ) समानख्यानाः प्रजाजनाः ( समुद्रे मध्ये ) समुद्रस्य 'व्यत्ययेन सप्तमी' कामस्य दुर्व्यसनस्य मध्ये "कामं समुद्रमाविश" [ तै. आ. ३ । १० । २ ] "समुद्र इव हि कामः, नैव हि कामस्यान्तोऽस्ति न समुद्रस्य" [ तै० २ । २ । ५ । ६ ] ( जहुः ) त्यजन्ति निमज्जयन्ति-व्यर्थं कुर्वन्ति, तदा ( यः युवाकुः-अरावा ) यः खलु युवां कामयमानो यं युवां कामयथः राष्ट्रयज्ञः सुखस्यादाता भवति, तदा ( ईं निः पर्षत् ) इमं युवांस कामसमुद्रात् निष्पारयतम्-निश्चयेन पारयथः ॥ ७ ॥

**भाषान्वयार्थः**—( अश्विना ) हे सभाधीश सेनानायक ( उत ) और ( त्यं भुज्युम् ) उस भोगने योग्य राष्ट्रयज्ञ को ( दुर-एवासः ) दुष्कामी दुर्व्यसनी ( सखायः ) प्रजाजन ( समुद्रे मध्ये ) काम भाव जैसे समुद्र के मध्य में ( जहुः ) त्यागते हैं डुबोते हैं, तब ( यः-युवाकुः-अरावा ) जो तुम्हें चाहने वाला या तुम जिसे चाहते हो वह राष्ट्रयज्ञ सुख न लेने वाला हो जाता है ( ईं निः पर्षत् ) उसे तुम कामव्यसन समुद्र से निकाल लेते हो बचा लेते हो ॥ ७ ॥

**भावार्थः**—राष्ट्र के अन्दर दुष्कामी दुर्व्यसनी जन प्रजाजन राष्ट्र को दुर्व्यसन समुद्र में डुबो दिया करते हैं, राजाधिकारियों को ऐसे जनों को शिक्षा-दण्ड देकर राष्ट्र से निर्वासित करके राष्ट्र को बचाना चाहिये ॥ ७ ॥

**वृकाय चिज्जसमानाय शक्तमुत श्रुतं शयवे हूयमाना ।**
**यावघ्न्यामपिन्वतमपो न स्तर्यं चिच्छक्त्यश्विना शचीभिः ।**
**॥ ८ ॥**

वृकाय । चित् । जसमानय । शक्तम् । उत । श्रुतन् । शयवे । हूयमाना । यौ । अघ्न्याम् । अपिन्वतम् । अपः । न । स्तर्यम् । चित् । शक्ती । अश्विना । शचीभिः ॥ ८ ॥

**सं० अन्वयार्थः**—( अश्विना ) हे सभासेनेशौ ( जसमानाय वृकाय चित् ) हिंसकाय घातकाय "जसु हिंसायाम्" [ चुरादि. ] चौराय चापि "वृकः स्तेननाम" [ निघ० ३ । २४ ] ( शक्तम् ) युवां दण्डयितुं शक्नुतम् ( उत ) अपि च ( हूयमाना ) आहूयमानौ ( शयवे श्रुतम् ) सुखेन शयनशीलाय सद्गुणवते "शयवे सुखेन शयनशीलाय"

[ ऋ० १ । ११२ । १६ दयानन्दः ] धर्मात्मने तदाह्वानं शृणुतं स्वीकुरुतम् ( यौ ) उभौ सभासेनेशौ युवाम् ( शक्ती ) निजशासनशक्त्या नीत्या ( शचीभिः ) प्रज्ञाभिः ( अघ्न्याम् ) अहन्तव्यां रक्षणीयां राष्ट्रभूमिम् "अघ्न्याः-वर्धयितुमर्हाः पृथिव्यादयः" [ यजु० १ । १ दयानन्दः ] ( अपिन्वतम् ) सेवेथाम् ( अपः- न स्तर्यम् ) यथा अपः-नदीः पारयितुं तदाच्छादनयोग्यं सेतुं नावं वा पारं गन्तुं सेवते जनः "स्तर्यः स्तृणन्ति याभिस्ताः" [ यजु० ३३ । १८ दयानन्दः ] "स्तरीषु नौकादिषु साधुम्" [ ऋ० १ । ११६ । २२ दयानन्दः ] ॥ ८ ॥

भाषान्वयार्थः—( अश्विना ) हे सभाध्यक्ष और सेनापति तुम ( जसमानाय वृकाय चित् ) घातक लुटेरे डाकू और चोर के लिए ( शक्तम् ) दण्ड देने में समर्थ हो ( उत ) और भी ( हूयमाना ) पुकारे जाते हुए ( शयवे श्रुतम् ) सुख से शयनशील रहने वाले सद्गुणी के लिए उसकी प्रार्थना प्रार्थनीय वस्तु को सुनो स्वीकार करो ( यौ ) जो दोनों तुम ( शक्ती ) शासनशक्ति रीति नीति से ( शचीभिः ) अपनी बुद्धियों से ( अघ्न्याम्-अपिन्वतम् ) नष्ट न होने देने वाली राष्ट्रभूमि को सेवन करो ( अपः-न स्तर्यम् ) जैसे जलों-नदियों के पार जाने को पुल या नौका का सेवन करते हैं ॥ ८ ॥

भावार्थः—राष्ट्रपति सेनापति को चाहिये राष्ट्र के अन्दर चोर डाकू को दण्ड देने में समर्थ हों और सुख से शान्त रहने वाले सद्गुणसम्पन्न की प्रार्थना और अभीष्ट वस्तु को स्वीकार करे, राष्ट्रभूमि की रक्षा और उसका सेवन करे नदियों के पुल नौका से पार जाने का प्रबन्ध करे ॥ ८ ॥

एष स्य कारुर्जरते सूक्तैरग्रे बुधान उषसां सुमन्मा ।
इषा तं वर्धदघ्न्या पयोभिर्यूयं पात स्वस्तिभिः सदा नः ॥९॥

एषः । स्यः । कारुः । जरते । सुऽउक्तैः । अग्रे । बुधानः । उषसाम् । सुऽमन्मा । इषा । तम् । वर्धत् अघ्न्या । पयःऽभिः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ९ ॥

सं० अन्वयार्थः—( एषः-स्यः सुमन्मा कारुः ) अयं स पवित्र-मनाः "मन्म धायि मनोऽध्यायि" [ निरु० ६ । २२ ] स्तोता पुरोहितः ( सूक्तैः-जरते ) शोभनवचनैर्वेदमन्त्रैः स्तौति परमात्मानं युवां च प्रशंसति ( उषसाम्-अग्रे बुधानः ) उषोवेलातः पूर्वं उत्थितः सन्

( पयोभिः- अघ्न्या ) यथा गौर्दुग्धं वर्धयति तथा ( तम्-इषा वर्धत् ) अन्नादिना वर्नयतम् 'पुरुषवचनव्यत्ययः' ( यूयं नः सदा पात ) 'आदरार्थं बहुवचनम्' युवामस्मान् कल्याणसाधनैः सदा रक्षतम् ॥ ६ ॥

भाषान्वयार्थः—( एषः-स्यः सुमनाः कारुः ) यह वह पवित्र मन वाला स्तोता ( सूक्तैः-जरते ) वेदमन्त्रों द्वारा स्तुति करता है परमात्मा की, आपकी भी प्रशंसा मंगलकामना करता है ( उषसाम्-अग्रे बुधानः ) उषावेला से पूर्व जागा हुआ ( तम्-इषा वर्धत् ) उसको अन्नादि से बढावा दो ( पयोभिः-अघ्न्या ) जैसे दूध आदि से गौ बढाती है ( यूयं नः स्वस्तिभिः सदा पात ) तुम हमारी कल्याणकर साधनों से सदा रक्षा करते रहो ॥ ६ ॥

भावार्थः—राष्ट्र में पवित्र मन वाले विद्वान् जो प्रातः उठते ही वेदमन्त्रों द्वारा परमात्मा की स्तुति करते हैं, राज्याधिकारियों की मंगलकामना भी करते हैं उनका राष्ट्र की ओर से पोषण होना चाहिये ॥ ६ ॥

**ऋषि भाष्यतोऽग्रे ऋग्वेदस्य सप्तमण्डलान्तर्गत षष्टितमसूक्तादग्रिमाणामष्टषष्टितमान्तानां सूक्तानां स्वामि ब्रह्ममुनि कृतं भाष्यम् ॥**